# VYAS PANCHANG

ज्योतिष-पंचांग-पूजा पाठ एवं ज्योतिष परामर्श

बालागाम,ता.केशोद,जिला.जूनागढ़,गुजरात,भारत(इन्डिया) पिन:362220

www.vyaspanchang.com, help@vyaspanchang.com, MO.NO.94087 28736 (11 AM TO 06 PM)

# कर्म मन्त्र संग्रह

संस्कृत

अनुक्रमणिका


| | |
|---|---|
| भद्रसूक्तम् | 1 |
| दिग्रक्षणादिकम् | 2 |
| गणपतिपूजनम् | 4 |
| पुण्याहवाचनप्रयोगः | 18 |
| मातृकास्थापनम् | 23 |
| सप्तघृतमातृकाः | 25 |
| आयुष्यमंत्रजपः | 26 |
| नान्दीश्राद्धम् | 27 |
| ऋत्विग्वरणम् | 27 |
| कङ्कणबन्धनम् | 27 |
| मण्डपप्रवेशपूर्वकदिग्रक्षणम् | 28 |
| पञ्चगव्यकरणम् | 28 |
| वास्तुमण्डलदेवतास्थापनम् | 29 |
| योगिनीमण्डलदेवतास्थापनम् | 37 |
| क्षेत्रपालमण्डलदेवतास्थापनम् | 46 |
| सर्वतोभद्रमण्डलदेवतास्थापनम् | 52 |
| कुण्डस्थदेवानां स्थापनम् | 58 |
| अग्निस्थापनम् | 59 |
| ग्रह स्थापनम् | 60 |
| अग्न्युत्तारणम् | 64 |
| लक्ष्मीहोमः | 65 |
| नवाहुतयः | 65 |
| दिक्पालबलिदानम् | 66 |
| पूर्णाहुतिः | 66 |
| वसोर्धारा | 68 |
| विसर्जनम् | 68 |

## ॥ भद्रसूक्तम् ॥

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽअपरीतासऽउद्भिदः ।
देवा नो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवेदिवे ॥

देवानाम्भद्रा सुमतिरृजूयतान्देवानांरातिरभि नो निवर्त्तताम् ।
देवानांसख्यमुपसेदिमा वयन्देवा नऽआयुः प्रतिरन्तु जीवसे ॥

तान्पूर्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् ।
अर्य्यमणँवरुणꣳ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥

तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

पृषदश्वा मरुतः पृश्निमातरः शुभँय्यावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽअवसागमन्निह ॥

भद्रङ्कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितँय्यदायुः ॥

शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर्ग्गन्तोः ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः ।
विश्वे देवाऽअदितिः पञ्च जनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ २५ । १४ - २३

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव
शान्तिः सा मा शान्तिरेधि ॥ ३६ । १७

यतोयतः समीहसे ततो नोऽअभयङ्कुरु ।
शन्नः कुरु प्रजाभ्योभयन्नः पशुभ्यः ॥ ३६ । २२

## रक्षोघ्नमंत्रा:

रक्षोहणँवलगहनँव्वैष्ण्णवीमिदमहन्तँवलगमुत्क्किरामि यम्मे निष्ट्टयो यममात्त्यो निचखानेदमहन्तँवलगमुत्क्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तँव-लगमुत्क्किरामि यम्मे सबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तँवलगमुत्क्किरामि यम्मे सजातो यमसजातो निचखानोत्क्कृत्त्याङ्किरामि ॥ ५ । २३

रक्षोहणो वो वलगहनः प्प्रोक्क्षामि व्वैष्ण्णवान्रक्षोहणो वो वलगहनोवनयामि व्वैष्ण्णवान्रक्षोहणो वो वलगहनोवस्तृणामि व्वैष्ण्णवान्रक्षोहणौ वाँवलगहनाऽउपदधामि व्वैष्ण्णवी रक्षोहणौ वाँवलगहनौ पर्य्यूहामि व्वैष्ण्णवी व्वैष्ण्णवमसि व्वैष्ण्णवा स्त्थ ॥ ५ । २५

रक्षसाम्भागोसि निरस्तꣳ रक्षऽइदमहꣳ रक्षोभि तिष्ठामीदमहꣳ रक्षोवबाधऽइदमहꣳ रक्षोधमन्तमो नयामि । घृतेन द्यावापृथिवी प्प्रोर्ण्णुवाथाँवायो व्वे स्त्तोकानामग्निराज्ज्यस्य व्वेतु स्वाहा स्वाहाकृतेऽऊर्द्ध्वनभसम्मारुतङ्गच्छतम् ॥ ६ । १६

रक्षोहा व्विश्श्वचर्षणिरभि योनिमयोहते । द्रोणे सधस्त्थमासदत् ॥ २६ । २६

## वरुणावाहनम्

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः ।
अहेडमानो व्वरुणेह बोद्ध्युरुशꣳस मा नऽआयुः प्प्रमोषीः ॥ १८ । ४९

## प्रतिष्ठापनम्

मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ज्ञमिमन्तनोत्त्वरिष्टँय्यज्ज्ञꣳ समिमन्दधातु ।
व्विश्श्वे देवासऽइह मादयन्तामो३म्प्रतिष्ठ ॥ २ । १३

## प्रोक्षणम्

पवित्रे स्त्थो व्वैष्ण्णव्यौ सवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्त्कामः पुने तच्छकेयम् ॥ १ । १२ - ४ । ४

सवितुस्त्वा प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । सवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तेजोसि शुक्क्रमस्यमृतमसि धाम नामासि प्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ १ । ३१

आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ३६ । (१४ - १५ - १६))

## दीपपूजनम्

अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वान् ।
सहस्रदाऽअसि सहस्राय त्वा ॥ १३ । ४०

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ।
अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ।
ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ ३ । ९

## शङ्खपूजनम्

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ २६ । ९

## घंटापूजनम्

सुपर्णोसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽआत्मा
च्छन्दाᳪंस्यङ्गानि यजूᳪंषि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियम्पुच्छ-
न्धिष्ण्याः शफाः । सुपर्णोसि गरुत्मान्दिवङ्गच्छ स्वः पत ॥ १२ । ४

## सूर्यपूजनम्

आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ३३ । ४३

हᳪंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योम-
सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ १० । २४

## भूमिपूजनम्

भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीन्दृᳪंह पृथिवीम्मा हिᳪंसीः ॥ १३ । १८

### भैरवनमस्कारः

यो भूतानामधिपतिर्यस्मिँल्लोकाऽअधिश्रिताः ।
यऽईशे महतो महाँस्तेन गृह्णामि त्वामहम्मयि गृह्णामि त्वामहम् ॥ २० । ३२

भूताय त्वा नारातये स्वरभिविख्येषन्दृꣳहन्तान्दुर्याः पृथिव्यामुर्वन्तरिक्षमन्वेमि
पृथिव्यास्त्वा नाभौ सादयाम्यदित्याऽउपस्थेऽग्ने हव्यꣳ रक्ष ॥ १ । ११

## ॥ गणपतिपूजनम् ॥

### ध्यानम्

गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा
निधिपतिꣳ हवामहे वसो मम ।
आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ २३ । १९

असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गण-
पतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय
स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥ २२ । ३०

सोमानꣳ स्वरणङ्कृणुहि ब्रह्मणस्पते । कक्षीवन्तँय्यऽऔशिजः ॥ ३ । २८

### आवाहनम्

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३१ । १

आ वो देवासऽईमहे वामम्प्रयत्यध्वरे ।
आ वो देवासऽआशिषो यज्ञियासो हवामहे ॥ ४ । ५

आगन्म विश्ववेदसमस्मभ्यँव्वसुवित्तमम् ।
अग्ने सम्राडभि द्युम्नमभि सहऽआयच्छस्व ॥ ३ । ३८

### आसनम्

पुरुष एवेदꣳ सर्वँय्यद्भूतँय्यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ३१ । २

वर्ष्मोऽस्मिसमानाना मुद्यतामिवसूर्षः।
इमन्तमभितिष्ठामि षोमा कश्चाभिदासति ॥

स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥ ११ । ४४

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिः पुरस्तात् ॥ ३३ । ७४

आसीनासोऽअरुणीनामुपस्थे रयिन्धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत तऽइहोर्जन्दधात ॥ १९ । ६३

## पाद्यम्

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३१ । ३

प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निम्पुरीष्यम्मा पाद्यायुषः पुरा ॥ ११ । ४६

हिरण्यशृङ्गोऽयोऽअस्य पादा मनोजवाऽअवरऽइन्द्रऽआसीत् ।
देवाऽइदस्य हविरद्यमायन्योऽअर्वन्तम्प्रथमोऽअध्यतिष्ठत् ॥ २९ । २०

## अर्घ्यम्

त्रिपादूर्ध्वऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ३१ । ४

धामन्ते विश्वम्भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तन्तऽऊर्मिम् ॥ १७ । ९९

अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः ।
तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ ११ । ३८

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ।
अपामीवाम्बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥ ३४ । २५

## आचमनीयम्

ततो विराडजायत विराजोऽअधि पूरुषः ।
स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ३१ । ५

इमम्मे व्वरुण श्श्रुधी हवमुद्या च मृडय । त्वामवस्युराचके ॥ २१ । १

त्रीन्त्समुद्रान्त्समसृपत्स्वर्ग्गानपाम्पतिर्वृषभऽइष्टकानाम् ।
पुरीषँव्वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥ १३ । ३१

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च
व्वयन्द्विष्म्मः ॥ ३५ । १२

अहाव्यग्ने हविरास्ये ते स्रुचीव घृतञ्चम्वीव सोमः ।
व्वाजसनिꣳ रयिमस्मे सुवीरम्प्रशस्तन्धेहि यशसम्बृहन्तम् ॥ २० । ७९

**मधुपर्कः**

यन्मधुनो मधव्यं परमं रूपमन्नाद्यम् ।
तेनाहं मधुनो मधव्येन परमेण रुपेणान्नाद्येन मधव्योन्ना दोसान् ॥

मधु व्वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्न्नः सन्त्वोषधीः ॥ १३ । २७

मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥ १३ । २८

मधुमान्नो व्वनस्पतिर्म्मधुमाँ२ऽअस्तु सूर्य्यः । माध्वीर्ग्गावो भवन्तु नः ॥ १३ । २९

तेजोसि तेजो मयि धेहि व्वीर्य्यमसि व्वीर्य्यम्मयि धेहि बलमसि बलम्मयि धेह्योजोस्योजो मयि धेहि मन्युरसि मन्युम्मयि धेहि सहोसि सहो मयि धेहि ॥ १९ । ९

**स्नानम्**

तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रे व्वायव्यानारण्या ग्ग्राम्म्याश्च ये ॥ ३१ । ६

आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । व्विश्वꣳ हि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूतऽएमि ॥ ४ । २

अपो देवा मधुमतीरगृभ्णन्नूर्ज्जस्वती राजस्वश्चितानाः ।
याभिर्म्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १० । १

**पयःस्नानम्**

पयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्प्रदिशः सन्तु मह्यम् ॥ १८ । ३६

पयसो रूपँय्यद्यवा दध्नो रूपङ्कर्कन्धूनि ।
सोमस्य रूपँवाजिनꣳ सौम्यस्य रूपमामिक्षा ॥ १९ । २३

सोममद्भ्यो व्यपिबच्छन्दसा हꣳसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ १९ । ७४

इमꣳ स्तनमूर्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सञ्जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्व ॥ १७ । ८७

सम्मा सृजामि पयसा पृथिव्याः सम्मा सृजाम्यद्भिरोषधीभिः ।
सोहँवाजꣳ सनेयमग्ने ॥ १८ । ३५

ताꣳ सवितुर्वरेण्यस्य चित्रामाहँवृणे सुमतिँविश्वजन्याम् ।
यामस्य कण्वोऽअदुहत्प्रपीनाꣳ सहस्रधाराम्पयसा महीङ्गाम् ॥ १७ । ७४

तेजः पशूनाꣳ हविरिन्द्रियावत्परिस्रुता पयसा सारघम्मधु ।
अश्विभ्यान्दुग्धम्भिषजा सरस्वत्या सुतासुताभ्याममृतः सोमऽइन्दुः ॥ १९ । ९५

## दधिस्नानम्

दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र णऽआयूꣳषि तारिषत् ॥ २३ । ३२

यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमन्तꣳ शुक्रम्मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ॥ १९ । ३४

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनँवसुविदम्भगन्नो रथमिवाश्वा वाजिनऽआवहन्तु ॥ ३४ । ३९

## घृतस्नानम्

घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतँवृषभ वक्षि हव्यम् ॥ १७ । ८८

घृतङ्घृतपावानः पिबत वसाँवसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ।
दिशः प्प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्ग्भ्यः स्वाहा ॥ ६ । १९

घृतवती भुवनानामभिश्श्रियोर्वी पृत्थ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्म्मणा विष्कभिते ऽअजरे भूरिरेतसा ॥ ३४ । ४५

अश्श्वावतीर्ग्गोमतीर्न्नऽउषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतन्दुहाना विश्श्वतः प्प्रपीता यूयम्पात स्वस्तिभिः सदा नः ॥ ३४ । ४०

घृतेनाञ्जन्त्सम्पथो देवयानान्प्रजानन्वाज्यप्प्येतु देवान् ।
अनु त्वा सप्ते प्प्रदिशः सचन्ताᳬ स्वधामस्म्मै यजमानाय धेहि ॥ २९ । २

आयुष्म्मानग्ने हविषा वृधानो घृतप्प्रतीको घृतयोनिरेधि ।
घृतम्पीत्त्वा मधु चारु गव्यम्पितेव पुत्रमभिरक्षतादिमान्त्स्वाहा ॥ ३५ । १७

## मधुस्नानम्

स्वाहा मरुद्भिः परिश्श्रीयस्व दिवः सᳬस्पृशस्प्पाहि । मधु मधु मधु ॥ ३७ । १३

धानाः करम्भः सक्तवः परीवापः पयो दधि ।
सोमस्य रूपᳪ हविषऽआमिक्षा वाजिनम्मधु ॥ १९ । २१

ऋतव स्त्थऽऋतावृधऽऋतुष्ट्ठा स्त्थऽऋतावृधः ।
घृतश्श्चुतो मधुश्श्चुतो विराजो नाम कामदुघाऽअक्क्षीयमाणाः ॥ १७ । ३

ये देवा देवानाँय्यज्ज्ञिया यज्ज्ञियानाᳬ सँव्वत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ज्ञेऽअस्म्मिन्त्स्वयम्पिबन्तु मधुनो घृतस्य ॥ १७ । १३

यस्त्ते रसः सम्भृतऽओषधीषु सोमस्य शुष्म्मः सुरया सुतस्य ।
तेन जिन्व यजमानम्मदेन सरस्वतीमश्श्विनाविन्द्रमग्ग्निम् ॥ १९ । ३३

अब्भ्यर्षत सुष्टुतिङ्गव्यमाजिमस्म्मासु भद्रा द्रविणानि धत्त ।
इमँय्यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ १७ । ९४

तनूनपात्त्पथऽऋतस्य यानान्मद्ध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ज्ञमृन्धन्देवत्रा च कृणुह्यध्वरन्नः ॥ २९ । २६

## शर्करास्नानम्

अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् । अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ९ । ३

स्वाद्वीन्त्वा स्वादुना तीव्रान्तीव्रेणामृताममृतेन । मधुमतीम्मधुमता सृजामि सꣳ सोमेन । सोमोस्यश्विभ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥ १९ । १

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥ २६ । २५

सरस्वती योन्याङ्गर्भमन्तरश्विभ्याम्पत्नी सुकृतम्बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्नेन्द्रꣳ श्रियै जनयन्नप्सु राजा ॥ १९ । ९४

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेनाऽइषुबलाऽअमृध्राः सतोवीराऽउरवो व्रातसाहाः ॥ २९ । ४६

## पञ्चामृतस्नानम्

पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेभवत्सरित् ॥ ३४ । ११

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च मऽऔद्भिद्यञ्च मे यज्ञेन कल्पन्ताम्॥ १८ । ९

घृतेन सीता मधुना समज्यताँ विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाभ्यावृत्स्व ॥ १२ । ७०

## गन्धोदकस्नानम्

गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ २ । ३

देव सवितः प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय । दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥ ११ । ७

## उद्वर्तनस्नानम्

अꣳशुना तेऽअꣳशुः पृच्यताम्परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसोऽअच्युतः ॥ २० । २७

सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च ।
सुरायै बभ्र्वै मदे किन्त्वो वदति किन्त्वः ॥ २० । २८

त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् ॥ ३ । ६०

प्र तद्वोचेदमृतन्नु विद्वान्गन्धर्वो धाम विभृतङ्गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ॥ ३२ । ९

## तीर्थोदकस्नानम्

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥ १६ । ६१

## शुद्धोदकस्नानम्

शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्राय
पशुपतये कर्णा यामाऽअवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥ २४ । ३

वाचन्ते शुन्धामि प्राणन्ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रन्ते शुन्धामि नाभिन्ते
शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि चरित्राँस्ते शुन्धामि ॥ ६ । १४

## वस्त्रम्

तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ३१ । ७

सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः ।
वासोऽअग्ने विश्वरूपꣳ सँव्ययस्व विभावसो ॥ ११ । ४०

युवासुवासाः परिवीतऽआगात्स उ श्रेयान्भवति जायमान: ।
तं धीरास: कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त: ॥

उषासानक्ता बृहती बृहन्तम्पयस्वती सुदुघे शूरमिन्द्रम् ।
तन्तुन्ततम्पेशसा सँव्वयन्ती देवानान्देवँय्यजतः सुरुक्मे ॥ २० । ६१

सीसे॑न॒ तन्त्र॒म्मन॑सा मनी॒षिण॑ऽऊर्ण्णासू॒त्रेण॑ क॒वयो॑ वयन्ति ।
अ॒श्विना॑ य॒ज्ञꣳ स॑वि॒ता सर॑स्वती॒न्द्रस्य॑ रू॒पँव्वरु॑णो भिष॒ज्यन् ॥ १९ । ८०

वसो॑: प॒वित्र॑मसि॒ द्यौर॑सि पृथि॒व्य॒सि मा॒तरि॒श्वनो॑ घ॒र्म्मो॑सि वि॒श्वधा॑ऽअसि ।
प॒र॒मेण॒ धाम्ना॒ दृꣳह॑स्व॒ मा ह्वा॒र्म्मा ते॑ य॒ज्ञप॑तिर्ह्वार्षीत् ॥ १ । २

## यज्ञोपवीतम्

तस्मा॒दश्वा॑ऽअजायन्त॒ ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॑त्तस्माज्जा॒ता॑ऽअ॑जा॒वय॑: ॥ ३१ । ८

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

नमो॑ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शाञ्च॒ पत॑ये॒ नमो॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒-
नाम्पत॑ये॒ नमो॒ नम॑: शष्पिञ्जराय॒ त्विषी॑मते पथी॒नाम्पत॑ये॒ नमो॒ नमो॒ हरि॑केशा-
योपवी॒तिने॑ पु॒ष्टाना॒म्पत॑ये॒ नम॑: ॥ १६ । १७

व्र॒तङ्कृ॑णुत व्र॒तङ्कृ॑णुता॒ग्निर्ब्रह्मा॒ग्निर्य॒ज्ञो व॑न॒स्पति॑र्य॒ज्ञिय॑: । दैवी॒न्धिय॑म्मनामहे
सु॒मृ॒डी॒काम॒भिष्ट॑ये व॒र्चो॒धाँय॒ज्ञवा॑हसꣳ सुती॒र्था नो॑ऽअस॒द्वशे॑ । ये दे॒वा मनो॑जाता
मनो॒युजो॒ दक्ष॑क्रतवस्ते नो॑वन्तु॒ ते न॑: पान्तु॒ तेभ्य॒: स्वाहा॑ ॥ ४ । ११

य॒ज्ञो दे॒वाना॒म्प्रत्ये॑ति सु॒म्नमादि॑त्यासो॒ भव॑ता मृड॒यन्त॑: ।
आ वो॒र्वाची॑ सुम॒तिर्व॑वृत्याद॒ꣳहोश्चि॒द्या व॑रिवो॒वित्त॒रास॑त् ॥ ३३ । ६४

ए॒तन्ते॑ देव सवितर्य॒ज्ञम्प्राहु॒र्बृह॒स्पत॑ये ब्र॒ह्मणे॑ ।
तेन॑ य॒ज्ञम॑व॒ तेन॑ य॒ज्ञप॑तिन्तेन॒ माम॑व ॥ २ । १२

## गन्धः

तँय॒ज्ञम्ब॒र्हिषि॒ प्रौक्ष॒न्पुरु॑षञ्जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा॑ऽअयजन्त सा॒ध्या॑ऽऋष॑यश्च॒ ये ॥ ३१ । ९

त्वाङ्ग॑न्ध॒र्वा॑ऽअखनँस्त्वामिन्द्र॒स्त्वाम्बृह॒स्पति॑: ।
त्वामो॑षधे॒ सोमो॒ राजा॑ वि॒द्वान्यक्ष्मा॑दमुच्यत ॥ १२ । ९४

ऋ॒ता॒षाडृ॒तधा॑मा॒ग्निर्ग॑न्ध॒र्वस्तस्यौष॑धयोऽप्स॒रसो॒ मुदो॒ नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्य॒: स्वाहा॑ ॥ १८ । ३८

वातो वा मनो वा गन्धर्वाः सप्तविꣳशतिः ।
तेऽअग्ग्रेऽश्वमयुञ्जँस्तेऽअस्म्मिञ्जवमादधुः ॥ ९ । ७

यद्दूवध्यमुदरस्यापवाति यऽआमस्य क्रविषो गन्धोऽअस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ शृतपाकम्पचन्तु ॥ ३५ । ३३

अक्षता:

अक्षन्नमीमदन्त ह्यव प्प्रियाऽअधूषत । अस्तोषत स्वभानवो विप्प्रा नविष्ठया
मती योजा न्विन्द्र ते हरी ॥ ३ । ५१

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्प्रियङ्ग-
वश्च मेणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन
कल्प्पन्ताम् ॥ १८ । १२

वाजो नोऽअद्य प्प्रसुवाति दानँवाजो देवाँ२॥ऽऋतुभिः कल्प्पयाति ।
वाजो हि मा सर्ववीरञ्जजान विश्वाऽआशा वाजपतिर्ज्जयेयम् ॥ १८ । ३३

धानावन्तङ्करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्प्रातर्ज्जुषस्व नः ॥ २० । २९

पुष्पाणि

यत्पुरुषँव्यदधुः कतिधा व्यकल्प्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादाऽउच्च्येते ॥ ३१ । १०

ओषधीः प्प्रतिमोदद्ध्वम्पुष्प्पवतीः प्प्रसूवरीः ।
अश्वाऽइव सजित्त्वरीर्वीरुधः पारयिष्ण्ण्वः ॥ १२ । ७७

याऽओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्प्पतिप्प्रसूताऽअस्यै सन्दत्त वीर्य्यम् ॥ १२ । ९२

ओषधयः प्प्रतिगृब्भ्णीत पुष्प्पवतीः सुपिप्पलाः ।
अयँवो गर्ब्भऽऋत्त्वियः प्प्रत्नꣳ सधस्त्थमासदत् ॥ ११ । ४८

नमो रोहिताय स्त्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधी-
नाम्पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये नमो नमऽउच्चैर्ग्घोषाया-
क्रन्दयते पत्तीनाम्पतये नमः ॥ १६ । १९

## पुष्पमाला

द्याम्मा लेखीरन्तरिक्षम्मा हिꣳसीः पृथिव्या सम्भव। अयꣳ हि त्वा स्वधितिस्ते-
तिजानः प्प्रणिनाय महते सौभगाय। अतस्त्वन्देव वनस्प्पते शतवल्शो विरोह
सहस्रवल्शा वि वयꣳ रुहेम ॥ ५ । ४३

## दूर्वा

काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्प्परि।
एवा नो दूर्वे प्प्रतनु सहस्रेण शतेन च ॥ १३ । २०

## सौभाग्यद्रव्याणि

अहिरिव भोगैः पर्य्येति बाहुञ्ज्यायां हेतिम्परिबाधमानः।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमाꣳसम्परिपातु विश्वतः॥ २९ । ५१

सिन्धोरिव प्प्राध्वने शूघनासो वातप्प्रमियः पतयन्ति यह्वाः।
घृतस्य धाराऽअरुषो न वाजी काष्ठा भिन्दन्नूर्म्मिभिः पिन्वमानः॥ १७ ।९५

नाभिर्म्मे चित्तंविज्ञानम्पायुर्म्मेपचितिर्भसत्।
आनन्दनन्दावाण्डौ मे भगः सौभाग्ग्यम्पसः।
जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मि विशि राजा प्प्रतिष्ठितः॥ २० । ९

कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः। अभि त्वा रुद्रा वसवो
गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्य्यू सादयतामिह त्वा ॥ १४ । २

सुसन्दृशन्त्वा वयम्मघवन्वन्दिषीमहि। प्र नूनम्पूर्ण्णवन्धुर स्तुतो यासि वशाँ२॥ऽअनु
योजा न्विन्द्र ते हरी ॥ ३ । ५२

## धूपः

ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रोऽअजायत ॥ ३१ । ११

धूरसि धूर्व धूर्वन्तन्धूर्व तँय्योस्म्मान्धूर्वति तन्धूर्व यँवयन्धूर्वामः।
देवानामसि वह्नितमꣳ सस्नितमम्पप्प्रितमञ्जुष्टतमन्देवहूतमम् ॥ १ । ८

अश्श्वस्य त्वा वृष्ण्णः शक्क्ना धूपयामि देवयजने पृथिव्याः । मुखाय त्वा मुखस्य
त्वा शीर्ष्ष्णे । अश्श्वस्य त्वा वृष्ण्णः शक्क्ना धूपयामि देवयजने पृथिव्याः । मुखाय
त्वा मुखस्य त्वा शीर्ष्ष्णे । अश्श्वस्य त्वा वृष्ण्णः शक्क्ना धूपयामि देवयजने पृथिव्याः ।
मुखाय त्वा मुखस्य त्वा शीर्ष्ष्णे । मुखाय त्वा मुखस्य त्वा शीर्ष्ष्णे । मुखाय त्वा
मुखस्य त्वा शीर्ष्ष्णे । मुखाय त्वा मुखस्य त्वा शीर्ष्ष्णे ॥ ३७ । ९

वसवस्त्वा धूपयन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन च्छन्द-
साङ्गिरस्वदादित्यास्त्वा धूपयन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्श्वे त्वा देवा
वैश्वानरा धूपयन्त्वानुष्टुभेन च्छन्दसाङ्गिरस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु
विष्ण्णुस्त्वा धूपयतु ॥ ११ । ६०

**दीपः**

चन्द्रमा मनसो जातश्श्चक्षोः सूर्य्यो ऽअजायत ।
श्रोत्राद्वायुश्श्च प्प्राणश्श्च मुखादग्निरजायत ॥ ३१ । १२

चन्द्रमा ऽअप्प्स्वन्तरा सुपर्ण्णो धावते दिवि ।
रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳ हरिरेति कनिक्क्रदत् ॥ ३३ । ९०

शुक्क्रज्योतिश्श्च चित्रज्योतिश्श्च सत्त्यज्योतिश्श्च ज्योतिष्म्माँश्श्च ।
शुक्क्रश्श्च ऽऋतपाश्श्चात्त्यꣳहाः ॥ १७ । ८०

प्रथमा वांꣳ सरथिना सुवर्ण्णा देवौ पश्श्यन्तौ भुवनानि विश्श्वा ।
अपिप्प्रयञ्चोदना वाम्मिमाना होतारा ज्योतिः प्प्रदिशा दिशन्ता ॥ २९ । ७

पृथिव्या ऽअहमुदन्तरिक्क्षमारुहमन्तरिक्क्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहम् ॥ १७ । ६७

**नैवेद्यम्**

नाब्भ्या ऽआसीदन्तरिक्क्षꣳ शीर्ष्ष्णो द्यौः समवर्त्तत ।
पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ२॥ ऽअकल्प्पयन् ॥ ३१ । १३

अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्म्मिणः ।
प्रप्प्र दातारन्तारिष ऽऊर्ज्जन्नो धेहि द्विपदे चतुष्प्पदे ॥ ११ । ८३

अन्ध स्त्थान्धो वो भक्षीय मह स्त्थ महो वो भक्षीयोर्ज्ज स्त्थोर्ज्जँवो भक्षीय
रायस्प्पोष स्त्थ रायस्प्पोषँवो भक्षीय ॥ ३ । २०

कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्व्वँवियूय ।
इहेहैषाङ्कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिँय्यजन्ति ॥ २३ । ३८

स्तोकानामिन्दुम्प्रति शूरऽइन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्प्रुषा मनसा मोदमानाः स्वाहा देवाऽअमृता मादयन्ताम् ॥ २० । ४६

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्श्रोत्राय स्वाहा वाचे
स्वाहा मनसे स्वाहा ॥ २२ । २३

## तांबूलम्

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्ज्यङ्ग्रीष्म्मऽइद्ध्मः शरद्धविः ॥ ३१ । १४

उत स्म्मास्य द्रवतस्तुरण्ण्यतः पर्ण्णन्न वेरनुवाति प्प्रगर्द्धिनः ।
श्येनस्येव ध्रजतोऽअङ्कसम्परि दधिक्राव्ण्णः सहोर्ज्जा तरित्रतः स्वाहा ॥ ९ । १५

याः फलिनीर्य्याऽअफलाऽअपुष्प्पा याश्च पुष्प्पिणीः ।
बृहस्प्पतिप्प्रसूतास्ता नो मुञ्चन्त्वँहसः ॥ १२ । ८९

## दक्षिणा

यद्दत्तँय्यत्परादानँय्यत्पूर्त्तँय्याश्च दक्षिणाः ।
तदग्निर्वैश्श्वकर्म्मणः स्वर्द्देवेषु नो दधत् ॥ १८ । ६४

हिरण्ण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्म्मै देवाय हविषा विधेम ॥ १३ । ४

हिरण्ण्यपाणिमूतये सवितारमुपह्वये । स चेत्ता देवता पदम् ॥ २२ । १०

दिवो वा विष्ण्णऽउत वा पृथिव्व्या महो वा विष्ण्णऽउरोरन्तरिक्षात् ।
उभा हि हस्ता वसुना पृणस्वा प्प्रयच्छ दक्षिणादोत सव्व्यात् विष्ण्णवे त्वा ॥ ५ । १९

व्रतेन दीक्षामाप्प्नोति दीक्षयाप्प्नोति दक्षिणाम् ।
दक्षिणा श्श्रद्धामाप्प्नोति श्श्रद्धया सत्त्यमाप्प्यते ॥ १९ । ३०

अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवाऽअच्छा नक्षि द्युमत्तमꣳ रयिन्दाः ॥ ३ । २५

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च
मे हिरण्यञ्च मेयश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन
कल्पन्ताम् ॥ १८ । १३

## नीराजनम्

आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः ।
दिवः सदाꣳसि बृहती वितिष्ठसऽआ त्वेषं वर्त्तते तमः ॥ ३४ । ३२

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या
देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ १४ । २०

इदꣳ हविः प्रजननम्मेऽअस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतोऽअस्मासु धत्त ॥ १९ । ४८

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश
स्थ ते देवासो यज्ञमिमञ्जुषध्वम् ॥ ७ । १९

## प्रदक्षिणा

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ ३१ । १५

परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश ॥ ३२ । ११

प्रतिपदसि प्रतिपदे त्वानुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा ॥ ५ । ८

## मंत्रपुष्पाञ्जलिः

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो
गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥ १६ । २५

तन्तेऽएतमनु जोषम्भराम्म्येष नेत्त्वदपचेतयाताऽअग्नेः प्प्रियम्पाथोपीतम् ॥
सुꣳस्त्रुवभागा स्थेषा बृहन्तः प्प्रस्तरेष्ठाः परिधेयाश्च देवाः ।
इमाँवाचमभि विश्श्वे गृणन्तऽआसद्यास्मिन्न्बर्हिषि मादयद्ध्वꣳ स्वाहा वाट् ॥ २ । १७, १८

मूर्द्धानन्दिवोऽअरतिम्पृथिव्या वैश्श्वानरमृतऽआजातमग्निम् ।
कविꣳ सम्म्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः ॥ ७ । २४

प्रोह्यमाणः सोमऽआगतो वरुणऽआसन्द्यामासन्नोग्निराग्नीद्ध्रऽइन्द्रो हविर्द्धानेथर्व्वोपावह्रियमाणः ॥
विश्श्वे देवाऽअꣳशुषु न्न्युप्तो विष्ण्णुराप्प्रीतपाऽआप्प्याय्यमानो यमः सूयमानो
विष्ण्णुः सम्भ्रियमाणो वायुः पूयमानः शुक्रः पूतः शुक्रः क्षीरश्श्रीर्म्मन्थी
सक्तुश्श्रीर्व्विश्श्वे देवाः ॥ ५६, ५७

पितेवैधि सूनवऽआ सुशेवा स्वावेशा तन्न्वा सँव्विशस्वाश्श्विनाद्ध्वर्य्यू सादयतामिह त्वा ॥
पृथिव्याः पुरीषमस्यप्प्सो नाम तान्त्वा विश्श्वेऽअभिगृणन्तु देवाः ॥ १४ । ३ , ४

षोडशी स्तोमऽओजो द्रविणञ्चतुश्चत्त्वारिꣳश स्तोमो वर्च्चो द्रविणम् । अग्नेः
पुरीषमस्यप्प्सो नाम तान्त्वा विश्श्वेऽअभिगृणन्तु देवाः ॥ १५ । ३

समिद्धेऽअग्नावधि मामहानऽउक्क्थपत्त्रऽईड्यो गृभीतः ।
तप्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जा यद्यज्ञमयजन्त देवाः ॥ १७ । ५५

यस्येमाः प्प्रदिशो यस्य बाहू कस्म्मै देवाय हविषा विधेम ॥ २५ । १२

यऽआत्त्मदा बलदा यस्य विश्श्वऽउपासते प्प्रशिषँय्यस्य देवाः ॥ २५ । १३

अनागास्त्वन्नोऽअदितिः कृणोतु क्षत्रन्नोऽअश्श्वो वनताꣳ हविष्म्मान् ॥ २५ । ४५

इमा नु कम्भुवना सीषधामेन्द्रश्च विश्श्वे च देवाः ॥ २५ । ४६

बृहस्प्पते सवितर्ब्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳशिशाधि ।
वर्द्धयैनम्महते सौभगाय विश्श्वऽएनमनुमदन्तु देवाः ॥ २७ । ८

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साद्ध्या हविरदन्तु देवाः ॥ २९ । ११

सद्यो जातो व्यमिमीत यज्ञमग्निर्द्देवानामभवत्पुरोगाः ।
अस्य होतुः प्प्रदिश्श्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ २९ । ३६

अस्म्मे रुद्द्रा मेहना पर्व्वतासो वृत्रहत्त्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२॥ऽअवन्तु देवाः ॥ ३३ । ५०

नहि स्प्पशमविदन्नन्न्यमस्म्माद्वैश्श्वानरात्पुरऽएतारमग्ग्नेः ।
एमेनमवृधन्नमृताऽअमर्त्त्यंवैश्श्वानरङ्क्षैत्रजित्त्याय देवाः ॥ ३३ । ६०

यज्ज्ञेन यज्ज्ञमयजन्त देवास्त्तानि धर्म्माणि प्प्रथमान्न्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥ ३१ । १६

ॐ राजाधिराजय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नम: ॥ ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौम: सार्वायुषऽआन्तादापरार्धात् । पृथिव्यै समुद्रपर्यन्तायाऽएकराडिति । तदप्येष श्लोकोभिगीतो मरुत: परिवेष्टारो मरुत्तस्यावसन्गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवा: सभासद इति ॥

विश्श्वतश्च्चक्षुरुत विश्श्वतोमुखो विश्श्वतोबाहुरुत विश्श्वतस्प्पात् ।
सम्बाहुब्भ्यान्धमति सम्पतत्रैर्द्यावाभूमी जनयन्देवऽएकः ॥ १७ । १९

## ॥ पुण्याहवाचनप्रयोग: ॥

**भूमिस्पर्श:**

मही द्यौः पृथिवी च नऽइमँय्यज्ज्ञम्मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥ ८ । ३२

**यवप्रक्षेप:**

ओषधयः समवदन्त सोमेन सह राज्ज्ञा ।
यस्म्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥ १२ । ९६

**कलशस्थापनम्**

आजिग्घ्र कलशम्मह्या त्त्वा विशन्त्विन्दवः । पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्र-
न्धुक्क्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः ॥ ८ । ४२

**जलपूरणम्**

वरुणस्योत्त्तम्भनमसि वरुणस्य स्क्कम्भसर्ज्जनी स्त्थो वरुणस्यऽऋतसदन्न्यसि वरुणस्य
ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ४ । ३६

**गन्धप्रक्षेप:**

त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥ १२ । ९८

**धान्यप्रक्षेप:**

धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु
प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना
चक्षुषे त्वा महीनाम्पयोसि ॥ १ । २०

**सर्वौषधीप्रक्षेप:**

याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा ।
मनै नु बभ्रूणामहꣳ शतन्धामानि सप्त च ॥ १२ । ७५

**दूर्वाप्रक्षेप:**

काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ १३ । २०

**पञ्चपल्लवप्रक्षेप:**

अश्वत्थे वो निषदनम्पर्णे वो वसतिष्कृता ।
गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥ १२ । ७९

**सप्तमृद्प्रक्षेप:**

स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्रथाः ॥ ३६ । १३

**फलप्रक्षेप:**

याः फलिनीर्य्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥ १२ । ८९

**पञ्चरत्नप्रक्षेप:**

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ ११ । २५

**हिरण्यप्रक्षेप:**

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ १३ । ४

**रक्तसूत्रवेष्टनम्**

युवासुवासाः परिवीतऽआगात्स उ श्रेयान्भवति जायमानः ।
तं धीरास: कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त: ॥

### पूर्णपात्रस्थापनम्

पूर्ण्णा दर्व्वि परापत सुपूर्ण्णा पुनरापत । वस्नेव विक्क्रीणावहाऽइषमूर्ज्जꣳ शतक्रतो ॥ ३ । ४९

### वरुणावाहनम्

तत्त्वा यामि ब्ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः ।
अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा नऽआयुः प्प्रमोषीः ॥ १८ । ४९

### प्रतिष्ठापनम्

मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्ट्टँय्यज्ञꣳ समिमन्दधातु ।
विश्श्वे देवासऽइह मादयन्तामो३म्प्रतिष्ठ ॥ २ । १३

### कलशं धारयित्वा वदेत्

त्रीणि पदा विचक्क्रमे विष्ष्णुर्ग्गोपाऽअदाब्भ्यः । अतो धर्म्माणि धारयन् ॥ ३४ । ४३

त्रीणि तऽआहुर्द्दिवि बन्धनानि त्रीण्ण्यप्प्सु त्रीण्ण्यन्तः समुद्द्रे ।
उतेव मे वरुणश्छन्त्स्यर्व्वन्यत्रा तऽआहुः परमञ्जनित्रम् ॥ २९ । १५

त्रया देवाऽएकादश त्रयस्त्रिꣳशाः सुराधसः ।
बृहस्प्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥ २० । ११

### आशीर्वादः

भद्रङ्कर्ण्णेभिः शृणुयाम देवा भद्रम्पश्श्येमाक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितँय्यदायुः ॥ २५ । २१

देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानाꣳ रातिरभि नो निवर्त्तताम् ।
देवानाꣳ सक्ख्यमुपसेदिमा वयन्देवा नऽआयुः प्प्रतिरन्तु जीवसे ॥ २५ । १५

दीर्ग्घायुस्तऽओषधे खनिता यस्म्मै च त्वा खनाम्म्यहम् ।
अथो त्वन्दीर्ग्घायुर्ब्भूत्वा शतवल्शा विरोहतात् ॥ १२ । १००

द्रविणोदाः पिपीषति जुहोत प्प्र च तिष्ट्ठत । नेष्ट्रादृतुभिरिष्ष्यत ॥ २६ । २२

सविता त्वा सवानाꣳ सुवतामग्निर्ग्गृहपतीनाꣳ सोमो वनस्प्पतीनाम् । बृहस्प्पति-
र्व्वाचऽइन्द्रो ज्ज्यैष्ठ्याय रुद्द्रः पशुब्भ्यो मित्त्रः सत्त्यो वरुणो धर्म्मपतीनाम् ॥ ९ । ३९

न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत् ।
यो बिभर्त्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते
दीर्घमायुः ॥ ४ । ५१

उच्चा ते जातमन्धसो दिवि सद्भूम्याददे । उग्रꣳ शर्म्म महि श्रवः ॥ २६ । १६

**पात्रे उदकसेकः**

निकामेनिकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः
पच्यन्तां योगक्षेमो नः कल्पताम् ॥ २२ । २२

**पुण्याहम्**

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ १९ । ३९

**कल्याणम्**

यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च
स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः सम्-
ऋध्यतामुप मादो नमतु ॥ २६ । २

**ऋद्धिम्**

सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम । दिवं पृथिव्याऽअध्यारुहामाविदाम
देवान्त्स्वर्ज्योतिः ॥ ८ । ५२

**स्वस्ति**

स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ २५ । १९

**श्रीः**

मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥ ३९ । ४

**अभिषेकः**

पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ १८ । ३६

पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ ३४।११

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्य
ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ४।३६

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ १९।३९

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो
यन्तुर्यन्त्रियै दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥ ९।३०

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥ १८।३७

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्याया-
न्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥ २०।३

विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽआसुव ॥ ३०।३

धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञम्प्रावन्तु नः शुभे ॥ १८।७६

त्वँय्यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ १८।७७

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्रप्र दातारन्तारिषऽऊर्जन्नो धेहि द्विपदे चतुष्पदे ॥ ११।८३

द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वँ शान्तिः शान्तिरेव
शान्तिः सा मा शान्तिरेधि ॥ ३६।१७

यतोयतः समीहसे ततो नोऽअभयङ्कुरु ।
शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥ ३६।२२

सर्वेषां वाएषवेदानाꣳरसोयत्सामसर्वेषामेवैनमेतद्वेदानाꣳरसेनाभिषिञ्चति ।

### सुवासिनीभिर्नीराजनम्

अनाधृष्टा पुरस्तादग्नेराधिपत्त्यऽआयुर्म्मे दाः पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्त्ये
प्प्रजाम्मे दाः । सुषदा पश्चाद्देवस्य सवितुराधिपत्त्ये चक्षुर्म्मे दाऽआश्श्रुतिरुत्तरतो
धातुराधिपत्त्ये रायस्पोषम्मे दाः । विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्त्यऽओजो मे दा
विश्श्वाब्भ्यो मा नाष्ट्राब्भ्यस्पाहि मनोरश्वासि ॥ ३७।१२

## मातृकास्थापनम्

### गणेश:

गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहे निधीनान्त्वा
निधिपतिꣳ हवामहे वसो मम ।
आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ २३।१९

### गौरी

आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः । पितरञ्च प्प्रयन्त्स्वः ॥ ३।६

### पद्मा

हिरण्ण्यरूपाऽउषसो विरोकऽउभाविन्द्राऽउदिथः सूर्य्यश्च ।
आरोहतँवरुण मित्र गर्त्तन्ततश्चक्षाथामदितिन्दितिञ्च मित्रोसि वरुणोसि ॥ १०।१६

### शची

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूयऽइन्नु ते दानन्देवस्य पृच्यतऽआदित्त्येब्भ्यस्त्वा ॥ ८।२

### मेधा

मेधाम्मे वरुणो ददातु मेधामग्निः प्प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥ ३२।१५

### सावित्री

उपयामगृहीतोसि सावित्रोसि चनोधाश्चनोधाऽअसि चनो मयि धेहि ।
जिन्व यज्ञञ्जिन्व यज्ञपतिम्भगाय देवाय त्वा सवित्रे ॥ ८।७

**विजया**

विज्ज्यन्धनुः कपर्दिनो विशल्ल्यो बाणवाँ२॥ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥ १६।१०

**जया**

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्न्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ १६।२

**देवसेना**

देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानाꣳ रातिरभि नो निवर्त्तताम् ।
देवानाꣳ सक्ख्यमुपसेदिमा वयन्देवा नऽआयुः प्प्रतिरन्तु जीवसे ॥ २५।१५

**स्वधा**

पितृब्भ्यः स्वधायिब्भ्यः स्वधा नमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः
प्प्रपितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः । अक्क्षन्पितरोमीमदन्त पितरोती-
तृपन्त पितरः पितरः शुन्धद्ध्वम् ॥ ९।३६

**स्वाहा**

स्वाहा यज्ञम्मनसः स्वाहोरोरन्तरिक्क्षात्स्वाहा द्यावापृथिवीब्भ्याꣳ स्वाहा वाता-
दारभे स्वाहा ॥ ४।६

**मातरः**

अदितिर्द्यौरदितिरन्तरिक्क्षमदितिर्म्माता स पिता स पुत्रः ।
विश्श्वे देवाऽअदितिः पञ्च जनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ २५।२३

**लोकमातरः**

पृषदश्श्वा मरुतः पृश्निमातरः शुभँय्यावानो विदथेषु जग्म्मयः ।
अग्ग्निजिह्वा मनवः सूरचक्क्षसो विश्श्वे नो देवाऽअवसागमन्निह ॥ २५।२०

**धृतिः**

धृष्टिरस्यपाग्ग्नेऽअग्ग्निमामादञ्जहि निष्क्रव्यादꣳ सेधा देवयजँवह । ध्रुवमसि पृथिवी-
न्दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्न्युपदधामि भ्रातृव्यस्य वधाय ॥ १।१७

**पुष्टिः**

त्वष्टा तुरीपोऽअद्भुतऽइन्द्राग्नी पुष्टिवर्द्धना ।
द्विपदा च्छन्दऽइन्द्रियमुक्षा गौर्न्न वयो दधुः ॥ २१।२०

**तुष्टिः**

बृहस्पतेऽअति यदर्य्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्र-
जात तदस्म्मासु द्रविणन्धेहि चित्रम् ॥ २६।३

**आत्मनः कुलदेवता**

अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ २३।१८

समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा ।
मा मऽआयुः प्रमोषीर्म्मोऽअहन्तव वीरँविदेय तव देवि सन्दृशि ॥ ४।२३

## सप्तघृतमातृकाः

**श्रीः**

मनसः काममाकूतिँवाचः सत्त्यमशीय ।
पशूनाँ रूपमन्नस्य रसो यशः श्रीः श्रयताम्मयि स्वाहा ॥ ३९।४

**लक्ष्मीः**

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाण सर्व्वलोकम्मऽइषाण ॥ ३१।२२

**धृतिः**

इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा । उपसृजन्धरुणम्मात्रे धरुणो
मातरन्धयन् । रायस्पोषमस्म्मासु दीधरत्स्वाहा ॥ ८।५१

**मेधा**

मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥ ३२।१५

पुष्टिः

देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्द्धयन् ।
श्रोत्रन्न कर्णयोर्य्यशो जोष्ट्रीभ्यान्दधुरिन्द्रियँव्वसुवने वसुधेयस्य व्यन्तु यज ॥ २१।५१

श्रद्धा

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ १९।३०

(( स्वाहा

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः । पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा
वायवे स्वाहा । दिवे स्वाहा सूर्य्याय स्वाहा ॥ ३९।१

प्रज्ञा

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु ।
यस्मान्नऽऋते किञ्चन कर्म्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३४।३ ))

सरस्वती

देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन् । अस्पृक्षद्भारती दिवँ रुद्रैर्य्यज्ञँ
सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥ २८।१८

## आयुष्यमंत्रजपः

आयुष्यँव्वर्च्चस्यँ रायस्पोषमौद्भिदम् ।
इदँ हिरण्यँव्वर्च्चस्वज्जैत्रायाविशतादु माम् ॥ ३४।५०

न तद्रक्षाँसि न पिशाचास्तरन्ति देवानामोजः प्रथमजँ ह्येतत् ।
यो बिभर्त्ति दाक्षायणँ हिरण्यँ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते
दीर्घमायुः ॥ ३४।५१

यदाबध्नन्दाक्षायणा हिरण्यँ शतानीकाय सुमनस्यमानाः ।
तन्मऽआबध्नामि शतशारदायायुष्मान्जरदष्टिर्य्यथासम् ॥ ३४।५२

# नान्दीश्राद्धम्

### विसर्जनम्

वाजेवाजेवत वाजिनो नो धनेषु विप्प्राऽअमृताऽऋतज्ज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्ता यात पथिभिर्द्देवयानैः ॥ ९।१८

### अनुव्रजनम्

आ मा वाजस्य प्प्रसवो जगम्म्यादेमे द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा
मातरा चा मा सोमोऽअमृतत्त्वेन गम्म्यात् ॥ ९।१९

# ऋत्विग्वरणम्

### आचार्यवरणम्

बृहस्प्पतेऽअति यदर्य्योऽअर्हाद्द्युमद्विभाति क्क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्र-
जात तदस्म्मासु द्रविणन्धेहि चित्रम् ॥ २६।३

### ब्रह्मावरणम्

ब्रह्म जज्ज्ञानम्प्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः ।
स बुद्ध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ १३।३

### गाणपत्यवरणम्

गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहे निधीनान्त्वा
निधिपतिꣳ हवामहे वसो मम ।
आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ २३।१९

### सदस्यवरणम्

सदसस्प्पतिमद्भुतम्प्प्रियमिन्द्रस्य काम्म्यम् ।
सनिम्मेधामयासिषꣳ स्वाहा ॥ ३२।१३

# कङ्कणबन्धनम्

यदाबद्ध्नन्दाक्षायणा हिरण्ण्यꣳ शतानीकाय सुमनस्यमानाः ।
तन्मऽआबद्ध्नामि शतशारदायायुष्ष्मान्जरदष्टिर्य्यथासम् ॥ ३४।५२

तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकङ्गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचने दिवः ॥ १५।५०

## मण्डपप्रवेशपूर्वकदिग्रक्षणम्

कृणुष्व पाजः प्रसितिन्न पृथ्वीँय्याहि राजेवामवाँ२॥ऽइभेन ।
तृष्वीमनु प्रसितिन्द्रूणानोस्तासि विद्ध्य रक्षसस्तपिष्ठैः ॥ १३।९
तव भ्रमासऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसंन्दितो विसृज विष्वगुल्काः ॥ १३।१०
प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशोऽअस्याऽअदब्धः ।
यो नो दूरेऽअघशंसो योऽअन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥ १३।११
उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२॥ऽओषतात्तिग्महेते ।
यो नोऽअरातिꣳ समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम् ॥ १३।१२
ऊर्द्ध्वो भव प्रतिविद्ध्याद्ध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनाञ्जामिमजामिम्प्रमृणीहि शत्रून् ।
अग्नेष्ट्वा तेजसा सादयामि ॥ १३।१३

## पञ्चगव्यकरणम्

**गोमूत्रम्**

भूर्भुवः स्वः । तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३६।३

**गोमयम्**

मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६।१६

**क्षीरम्**

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ १२।११२

**दधि**

दधिक्क्राव्ण्णोऽअकारिषञ्जिष्ण्णोरश्श्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र णऽआयूꣳषि तारिषत् ॥ २३।३२

**आज्यम्**

तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ १।३१

**कुशोदकम्**

देवस्य त्वा सवितुः प्प्रसवेऽश्श्विनोर्ब्बाहुब्भ्याम्पूष्ण्णो हस्ताब्भ्याम् । १।२१

## वास्तुमण्डलदेवतास्थापनम्

**ब्रह्मा**

ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः ।
स बुद्ध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ १३।३

**अर्यमा**

अर्य्यमणम्बृहस्प्पतिमिन्द्रन्दानाय चोदय ।
वाचँविष्ण्णुꣳ सरस्वतीꣳ सवितारञ्च वाजिनꣳ स्वाहा ॥ ९।२७

**विवस्वान्**

असि यमोऽअस्यादित्त्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि ॥ २९।१४

**मित्रः**

मित्रस्य चर्षणीधृतोवो देवस्य सानसि । द्युम्नञ्चित्रश्श्रवस्तमम् ॥ ११।६२

**पृथ्वीधरः**

यद्ग्रामे यदरण्ण्ये यत्सभायाँय्यदिन्द्रिये ।
यदेनश्चकृमा वयमिदन्तदवयजामहे स्वाहा ॥ ३।४५

**सावित्रः**

वसोः पवित्रमसि शतधारँवसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्प्वा कामधुक्क्षः ॥ १।३

**सविता**

उदु त्त्यञ्जातवेदसन्देवँवहन्ति केतवः । दृशे विश्श्वाय सूर्य्यम् ॥ ३३।३१

**विबुधाधिप:**

स बोधि सूरिर्म्मघवा वसुपते वसुदावन् ।
युयोध्यस्मद्द्वेषांᳬसि विश्वकर्म्मणे स्वाहा ॥ १२।४३

**जय:**

यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महि जातन्तेऽअर्वन् ॥ २९।१२

**राजयक्ष्मा**

नाशयित्री बलासस्यार्शसऽउपचितामसि ।
अथो शतस्य यक्ष्माणाम्पाकारोरसि नाशनी ॥ १२।९७

**रुद्र:**

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ १६।२

**आप:**

आपो हि ष्ठा मयोभुवस्ता नऽऊर्ज्जे दधातन । महे रणाय चक्षसे ॥ ११।५०

**आपवत्स:**

इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ २१।१

**शिखी**

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ २५।१८

**पर्जन्य:**

महाँ॥ऽइन्द्रो वज्रहस्तः षोडशी शर्म्म यच्छतु । हन्तु पाप्मानँय्योऽस्मान्द्वेष्टि ॥ ७।४०

**जयन्त:**

उदु त्यञ्जातवेदसन्देवँव्वहन्ति केतवः । दृशे विश्वाय सूर्य्यम् ॥ ३३।३१

**कुलिशायुधः**

इन्द्रऽआसान्नेता बृहस्प्पतिर्द्दक्षिणा युज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मुरुतो युन्त्वग्ग्रम् ॥ १७।४०

**सूर्यः**

सूर्य्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ॥ऽअजस्रम् ।
तस्य पूषा प्प्रसुवे याति विद्वान्त्सम्पश्श्यन्विश्श्वा भुवनानि गोपाः ॥ १७।५८

**सत्यः**

व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।
दक्षिणा श्श्रद्धामाप्नोति श्श्रद्धया सुत्त्यमाप्प्यते ॥ १९।३०

**भृशः**

भायै दार्वाहारम्प्रभायाऽअग्ग्न्येधम्ब्रद्ध्नस्य व्विष्ट्टपायाभिषेक्तारँव्वर्षिष्ट्ठाय नाकाय परिवेष्टारन्देवलोकाय पेशितारम्मनुष्ष्यलोकाय प्प्रकरितारꣳ सर्व्वेब्भ्यो लोकेब्भ्यऽ उपसेक्तारमवऽऋत्त्यै व्वधायोपमन्थितारम्मेधाय व्वासःपल्प्पूलीम्प्रकामाय रजयि-
त्रीम् ॥ ३०।१२

**आकाशः**

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता व्वेदिषदतिथिर्द्दुरोणसत् । नृषद्वरसदृतसद्व्योम-
सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ १०।२४

**वायुः**

अप्प्स्वग्ग्ने सधिष्ट्टव सौषधीरनुरुद्ध्यसे । गब्भे सञ्जायसे पुनः ॥ १२।३६

**पूषा**

पूषा पञ्चाक्षरेण पञ्च दिशऽउदजयत्ताऽउज्जेषꣳ सविता षडक्षरेण षडृतूनुदजयत्तानु-
ज्जेषम्मुरुतः सप्प्ताक्षरेण सप्प्त ग्ग्राम्म्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्प्पतिरष्ट्टाक्ष-
रेण गायत्रीमुदजयत्तामुज्जेषम् ॥ ९।३२

**वितथः**

सुविता प्रथमेहन्नग्निर्द्वितीये वायुस्तृतीयऽआदित्यश्चतुर्थे चन्द्रमाः पञ्चमऽऋतुः
षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे । मित्रो नवमे वरुणो दशमऽइन्द्रऽएकादशे
विश्वे देवा द्वादशे ॥ ३९।६

**गृहक्षतः**

गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रतऽएमसि । ऊर्जं बिभ्रद्वः सुमनाः सुमेधा
गृहानैमि मनसा मोदमानः ॥ ३।४१

**यमः**

असि यमोऽअस्यादित्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि ॥ २९।१४

**गन्धर्वः**

गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड
ऽईडितः । इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्य-
ग्निरिडऽईडितः । मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै
यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ २।३

**भृङ्गराजः**

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति ।
कर्म्मणे वां वेषाय वाम् ॥ १।६

**मृगः**

चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ ३१।१२

**पितरः**

पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः
प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ १९।३६

**दौवारिकः**

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी
महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः
सभेयो युवास्य यजमानस्य वीरो जायतान्निकामेनिकामे नः पर्जन्यो वर्षतु फल-
वत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ २२।२२

**सुग्रीवः**

सुसमिद्धाय शोचिषे घृतन्तीव्रञ्जुहोतन । अग्नये जातवेदसे ॥ ३।२

**पुष्पदन्तः**

नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्द्धमासेभ्यः स्वाहा
मासेभ्यः स्वाहऽऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा सँवत्सराय स्वाहा द्यावापृथिवी-
भ्याꣳ स्वाहा चन्द्राय स्वाहा सूर्य्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा
रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा
मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा
फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ २२।२८

**वरुणः**

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनी स्त्थो वरुणस्यऽऋतसदन्यसि वरुणस्य
ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ४।३६

**असुरः**

ये रूपाणि प्प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्ट्टाँल्लोकात्प्प्रणुदात्त्यस्मात् ॥ २।३०

**शोषः**

असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गण-
पतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्प्पाय स्वाहा चन्द्राय
स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥ २२।३०

**पापः**

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरँवहन्ति मन्यवे ॥ १३।३६

**रोग:**

शिरो मे श्श्रीर्य्यशो मुखन्त्विषिः केशाश्च श्मश्श्रूणि ।
राजा मे प्प्राणोऽअमृतꣳ सम्म्राट्चक्क्षुर्व्विराट्श्श्रोत्रम् ॥ २०।५

**अहि:**

नमोस्तु सर्प्पेब्भ्यो ये के च पृथिवीमनु ।
येऽअन्तरिक्क्षे ये दिवि तेब्भ्यः सर्प्पेब्भ्यो नमः ॥ १३।६

**मुख्य:**

इषे त्त्वोर्ज्जे त्त्वा व्वायव स्त्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ट्ठतमाय कर्म्मणऽआप्प्या-
यद्ध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्त्तेनऽईशत माघशꣳसो
द्ध्रुवाऽअस्म्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॥ १।१

**भल्लाट:**

घृताच्च्यसि जुहूर्न्नाम्म्ना सेदम्प्रियेण धाम्म्ना प्प्रियꣳ सदऽआसीद घृताच्च्यस्युपभृ-
न्नाम्म्ना सेदम्प्रियेण धाम्म्ना प्प्रियꣳ सदऽआसीद घृताच्च्यसि द्ध्रुवा नाम्म्ना सेदम्प्रियेण
धाम्म्ना प्प्रियꣳ सदऽआसीद प्प्रियेण धाम्म्ना प्प्रियꣳ सदऽआसीद । द्ध्रुवाऽअसद-
न्नृतस्य योनौ ता व्विष्ण्णो पाहि पाहि यज्ञम्पाहि यज्ञपतिम्पाहि माँय्यज्ञ-
न्यम् ॥ २।६

**सोम:**

व्वयꣳ सोम व्व्रते तव मनस्त्तनूषु बिब्भ्रतः । प्रजावन्तः सचेमहि ॥ ३।५६

**सर्प:**

व्विष्ण्णोर्न्नुकँव्वीर्य्याणि प्प्रवोचँय्यः पार्त्थिवानि व्विममे रजाꣳसि ।
योऽअस्क्कभायदुत्तरꣳ सधस्त्थँव्विचक्क्रमाणस्त्त्रेधोरुगायो व्विष्ण्णवे त्त्वा ॥ ५।१८

**अदिति:**

अदितिर्द्यौरदितिरन्तरिक्क्षमदितिर्म्माता स पिता स पुत्रः ।
व्विश्श्वे देवाऽअदितिः पञ्च जनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ २५।२३

दितिः

ये देवा देवेष्वधि देवत्त्वमायन्ये ब्रह्मणः पुरऽएतारोऽअस्य ।
येभ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्याऽअधि स्नुषु ॥ १७।१४

चरकी

इन्धानास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि । वयस्वन्तो वयस्कृतꣳ सहस्वन्तः
सहस्कृतम् ॥ ३।१८

विदारी

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ १२।६२

पूतना

कया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ २७।३९

पापराक्षसी

इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम् ॥ १७।४०

स्कन्दः

त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ २१।३

अर्यमा

यदद्य सूरऽउदितेनागा मित्रोऽअर्यमा । सुवाति सविता भगः ॥ ३३।२०

जृम्भकः

सरोभ्यो धैवरमुपस्थावराभ्यो दाशँवैशन्ताभ्यो बैन्दन्नड्वलाभ्यः शौष्कलम्पा-
राय मार्गारमवाराय केवर्त्तन्तीर्थेभ्यऽआन्दँविषमेभ्यो मैनालꣳ स्वनेभ्यः
पर्णकङ्गुहाभ्यः किरातꣳ सानुभ्यो जम्भकम्पर्वतेभ्यः किम्पूरुषम् ॥ ३०।१६

**पिलिपिच्छः**

रक्षोहणँवलगहनँवैष्णवीमिदमहन्तँवलगमुत्किरामि यम्मे निष्ट्यो यममात्यो
निचखानेदमहन्तँवलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तँव-
लगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तँवलगमुत्किरामि यम्मे
सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥ ५।२३

**इन्द्रः**

त्रातारमिन्द्रमवितारमिन्द्रँ हवेहवे सुहवँ शूरमिन्द्रम् ।
ह्वयामि शक्रम्पुरुहूतमिन्द्रँ स्वस्ति नो मघवा धात्विन्द्रः ॥ २०।५०

**अग्निः**

त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषँ रक्षमाणस्तव व्रते ॥ ३४।१३

**यमः**

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ३८।९

**निर्ऋतिः**

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ १२।६२

**वरुणः**

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशँस मा नऽआयुः प्रमोषीः ॥ २१।२

**वायुः**

आ नो नियुद्भिः शतिनीभिरध्वरँ सहस्रिणीभिरुपयाहि यज्ञम् ।
वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥ २७।२८

**सोमः**

वयँ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ ३।५६

ईशान:

तमीशा॑नुञ्जग॑तस्तुस्थुष॒स्पतिं॑न्धियञ्जि॒न्वमव॑से हूमहे व॒यम् ।
पू॒षा नो॒ यथा॒ वेद॑सामस॑द्वृधे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥ २५।१८

ब्रह्मा

अ॒स्मे रु॒द्रा मे॒हना॒ पर्व॑तासो वृत्र॒हत्ये॒ भर॑हूतौ स॒जोषाः॑ ।
यः शंस॑ते स्तुव॒ते धायि॑ प॒ज्र इन्द्र॑ज्येष्ठा अ॒स्माँ२॥ऽअ॑वन्तु दे॒वाः ॥ ३३।५०

अनन्त:

स्यो॒ना पृ॑थिवि नो भवानृक्ष॒रा नि॒वेश॑नी । यच्छा॑ नः॒ शर्म॑ स॒प्रथाः॑ ॥ ३६।१३

## योगिनीमण्डलदेवतास्थापनम्

महाकाली

अम्बे॒ऽअम्बि॒केऽम्बा॑लिके॒ न मा॑ नयति॒ कश्च॒न । सस॑स्त्यश्व॒कः सु॒भ॑द्रिकाङ्का॒म्पील॒वासि॑नीम् ॥ २३।१८

महालक्ष्मी

श्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्या॑वहोरा॒त्रे पा॒र्श्वे नक्ष॑त्राणि रू॒पम॒श्विनौ॒ व्यात्त॑म् ।
इ॒ष्णन्नि॑षाणा॒मुम्म॑ऽइषाण स॒र्वलो॒कम्म॑ऽइषाण ॥ ३१।२२

महासरस्वती

पा॒व॒का नः॒ सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती । य॒ज्ञं॑व॑ष्टु धि॒याव॑सुः ॥ २०।८४

गजानना

तमीशा॑नुञ्जग॑तस्तुस्थुष॒स्पतिं॑न्धियञ्जि॒न्वमव॑से हूमहे व॒यम् ।
पू॒षा नो॒ यथा॒ वेद॑सामस॑द्वृधे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥ १५।१८

सिंहमुखी

आ ब्रह्म॑न्ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यता॒मा रा॒ष्ट्रे रा॑ज॒न्यः॒ शूर॑ऽइष॒व्यो॑ऽतिव्या॒धी
म॑हार॒थो जा॑यता॒न्दोग्ध्री॑ धे॒नुर्वोढा॑न॒ड्वाना॒शुः सप्तिः॒ पुर॑न्धि॒र्योषा॑ जि॒ष्णू र॑थे॒ष्ठाः
स॒भेयो॒ युवा॒स्य यज॑मानस्य वी॒रो जा॑यतान्निका॒मेनि॑कामे नः प॒र्जन्यो॑ वर्षतु॒ फल॑-
वत्यो न॒ऽओष॑धयः पच्यन्तां॑य्योगक्षे॒मो नः॑ कल्पताम् ॥ २२।२२

**गृध्यास्या**

मुहाराँ॥ऽइन्द्रो वज्ज्रहस्त्तः षोडुशी शर्म्म यच्छतु। हन्तु पाप्प्मानँय्योऽस्म्मान्द्वेष्ट्टि॥ ७।४०

**काकतुण्डिका**

सुद्यो जातो व्व्यमिमीत युज्ञमुग्ग्निर्द्देवानामभवत्पुरोगाः ।
अस्य होतुः प्प्रदिश्श्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ २९।३६

**उष्ट्रग्रीवा**

आदित्त्यङ्गर्ब्भम्पयसा सम्मङ्ग्धि सुहस्त्रस्य प्प्रतिमाँव्विश्श्वरूपम् ।
परिवृङ्ग्धि हरसा माभिमꣳस्थाः शतायुषङ्कृणुहि चीयमानः ॥ १३।४१

**हयग्रीवा**

स्वर्ण्ण घर्म्मः स्वाहा स्वर्ण्णार्क्कः स्वाहा स्वर्ण्ण शुक्रः स्वाहा स्वर्ण्ण ज्योतिः स्वाहा
स्वर्ण्ण सूर्य्यः स्वाहा ॥ १८।५०

**वाराही**

सत्त्यञ्च मे श्श्रद्धा च मे जगच्च मे धनञ्च मे विश्श्वञ्च मे महश्च मे क्रीडा च मे
मोदश्च मे जातञ्च मे जनिष्ष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे युज्ञेन कल्प्प-
न्ताम् ॥ १८।५

**शरभानना**

भायै दार्व्वाहारम्प्रभायाऽअग्ग्न्येधम्ब्रध्नस्य व्विष्टपायाभिषेक्त्तारँव्वर्षिष्ट्ठाय नाकाय
परिवेष्ट्टारन्देवलोकाय पेशितारम्मनुष्ष्यलोकाय प्प्रकरितारꣳ सर्व्वेब्भ्यो लोकेब्भ्यऽ
उपसेक्त्तारमवऽऋत्त्यै वधायोपमन्थितारम्मेधाय वासःपल्प्पूलीम्प्रकामाय रजयि-
त्रीम् ॥ ३०।१२

**उलूकिका**

जिह्वा मे भद्द्रँवाङ्महो मनो मन्न्युः स्वराड्भामः ।
मोदाः प्प्रमोदाऽअङ्गुलीरङ्गानि मित्त्रम्मे सहः ॥ २०।६

## शिवारावा

हिङ्कराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्प्रोथते स्वाहा
प्प्रप्प्रोथाय स्वाहा गन्धाय स्वाहा ग्घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा
सन्दिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा
जाग्ग्रते स्वाहा कूजते स्वाहा प्प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय
स्वाहा सꣳहानाय स्वाहोपस्स्थिताय स्वाहायनाय स्वाहा प्प्रायणाय स्वाहा ॥ २२।७

## मयूरी

अग्निश्च मऽआपश्च मे वीरुधश्च मऽओषधयश्च मे कृष्टपच्याश्च मेकृष्टपच्याश्च
मे ग्ग्राम्म्याश्च मे पशवऽआरण्याश्च मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे
यज्ञेन कल्प्पन्ताम् ॥ १८।१४

## विकटानना

पूषन्तव व्रते वयन्न रिष्ष्येम कदाचन । स्तोतारस्तऽइह स्म्मसि ॥ ३४।४१

## अष्टवक्रा

वेद्या वेदिꣳ समाप्प्यते बर्हिषा बर्हिरिन्द्रियम् ।
सूर्पेन सूर्पऽआप्प्यते प्प्रणीतोऽअग्निरग्निना ॥ १९।१७

## कोटराक्षी

अयमग्निः सहस्त्रिणो वाजस्य शतिनस्प्पतिः । मूर्द्धा कवी रयीणाम् ॥ १५।२१

## कुब्जा

इमम्मे वरुण श्श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ २१।१

## विकटलोचना

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ३८।९

## शुष्कोदरी

गन्धर्वस्त्वा विश्श्वावसुः परिदधातु विश्श्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड
ऽईडितः । इन्द्रस्य बाहुरसि दक्षिणो विश्श्वस्यारिष्ट्यै यजमानस्य परिधिरस्य-
ग्निरिडऽईडितः । मित्रावरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा विश्श्वस्यारिष्ट्यै
यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ २।३

ललजिह्वा

मित्रस्य चर्षणीधृतोवो देवस्य सानसि । द्युम्नञ्चित्रश्श्रवस्तमम् ॥ ११।६२

श्वदंष्ट्रा

अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षन्दृꣳह ब्रह्मवनि त्वा क्षत्रवनि
सजातवन्युपदधामि भ्रातृव्यस्य वधाय । धर्त्रमसि दिवन्दृꣳह ब्रह्मवनि त्वा
क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय । विश्वाभ्यस्त्वाशाभ्यऽउप-
दधामि चित स्थोर्ध्वचितो भृगूणामङ्गिरसान्तपसा तप्यध्वम् ॥ १।१८

वानरानना

भग प्रणेतर्भग सत्यराधो भगेमान्धियमुदवा ददन्नः ।
भग प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ३४।३६

रुक्षाक्षी

सुपर्णोसि गरुत्मान्पृष्ठे पृथिव्याः सीद ।
भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिशऽउद्दृꣳह ॥ १७।७२

केकराक्षी

उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः ।
असुंयऽईयुरवृकाऽऋतज्ञास्ते नोवन्तु पितरो हवेषु ॥ १९।४९

बृहत्तुण्डा

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्यऽऋतसदन्यसि वरुणस्य
ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ४।३६

सुराप्रिया

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतान्नः सुराधसः ॥ ३३।४६

कपालहस्ता

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योम-
सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ १०।२४

**रक्ताक्षी**

सुसन्दृशन्त्वा वयम्मघवन्वन्दिषीमहि । प्र नूनम्पूर्णवन्धुर स्तुतो यासि वशाँ२ ॥ऽअनु
योजा न्विन्द्र ते हरी ॥ ३।५२

**शुकी**

प्रतिपदसि प्प्रतिपदे त्वानुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा॥ १५।८

**श्येनी**

देवीर्द्वारोऽअश्विना भिषजेन्द्रे सरस्वती ।
प्राणन्न वीर्य्यन्नसि द्वारो दधुरिन्द्रियँवसुवने वसुधेयस्य व्यन्तु यज ॥ २१।४९

**कपोतिका**

देवस्य त्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् । सरस्वत्यै वाचो
यन्तुर्य्यन्त्रिये दधामि बृहस्प्पतेष्ट्वा साम्म्राज्ज्येनाभिषिञ्चाम्म्यसौ ॥ ९।३०

**पाशहस्ता**

देवस्य त्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् ।
सरस्वत्यै वाचो यन्तुर्य्यन्त्रेणाग्ग्नेः साम्म्राज्ज्येनाभिषिञ्चामि ॥ १८।३७

**दण्डहस्ता**

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्द्धानन्दधिषे स्वर्षाञ्जिह्वामग्ग्ने चकृषे हव्यवाहम् ॥ १५।२३

**प्रचण्डा**

कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूयऽइन्नु ते दानन्देवस्य पृच्यते ॥ ३।३४

**चण्डविक्रमा**

भद्रङ्कर्णेभिः श्रृणुयाम देवा भद्रम्पश्येमाक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितँय्यदायुः ॥ २५।२१

**शिशुघ्नी**

इषे त्त्वोर्ज्जे त्त्वा व्वायवं स्त्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ठ्ठतमाय कर्म्मणऽआप्प्याय-
यद्ध्वमग्घ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्त्तेनऽईशत माघशंꣳसो
द्ध्रुवाऽअस्मिन्न्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्न्पाहि ॥ १।१

**पापहन्त्री**

देवी द्यावापृथिवी मखस्य वामद्य शिरो राद्ध्यासन्देवयजने पृथिव्याः ।
मखाय त्त्वा मखस्य त्त्वा शीर्ष्णे ॥ ३७।३

**काली**

असुन्न्वन्तमयजमानमिच्छ स्त्तेनस्येत्त्यामन्न्विहि तस्क्करस्य ।
अन्न्यमस्म्मदिच्छ सा तऽइत्त्या नमो देवि निर्ऋते तुब्भ्यमस्त्तु ॥ १२।६२

**रुधिरपायिनी**

व्विश्श्वानि देव सवितर्द्दुरितानि परासुव । यद्भद्द्रन्तन्नऽआसुव ॥ ३०।३

**वसाधया**

अग्निश्च मे घर्म्मश्च मेर्क्कश्च मे सूर्य्यश्च मे प्प्राणश्च मेश्श्वमेधश्च मे पृथिवी च मेदितिश्च
मे दितिश्च मे द्यौश्च मेङ्गुलयः शक्क्वरयो दिशश्च मे यज्ञेन कल्प्पन्ताम् ॥ १८।२२

**गर्भभक्षा**

बह्वीनाम्पिता बहुरस्य पुत्त्रश्चिश्चाकृणोति समनावगत्त्य ।
इषुधिः सङ्काः पृतनाश्च सर्व्वाः पृष्ट्ठे निनद्धो जयति प्प्रसूतः ॥ २९।४२

**शवहस्ता**

नमस्त्ते रुद्द्र मन्न्यवऽउतो तऽइषवे नमः । बाहुब्भ्यामुत ते नमः ॥ १६।१

**आन्त्रमालिनी**

ऋतवस्त्ते यज्ञँव्वितन्न्वन्तु मासा रक्क्षन्तु ते हविः ।
सँव्वत्त्सरस्ते यज्ञन्दधातु नः प्प्रजाञ्च परिपातु नः ॥ २६।१४

.

**स्थूलकेशी**

तेऽआचरन्ती समनेव योषा मातेव पुत्रम्बिभृतामुपस्थे ।
अप शत्रून्विध्यताᳬ संविदानेऽआर्त्नीऽइमे विष्फुरन्तीऽअमित्रान् ॥ २९।४१

**बृहत्कुक्षी**

वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् ।
यूपेन यूपऽआप्यते प्रणीतोऽअग्निरग्निना ॥ १९।१७

**सर्पास्या**

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ २०।८४

**प्रेतवाहना**

अस्कन्नमद्य देवेभ्यऽआज्यᳬ सम्भ्रियासमङ्घ्रिणा विष्णो मा त्वावक्रमिषं वसु-
मतीमग्ने ते च्छायामुपस्थेषं विष्णो स्थानमसीतऽइन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वरऽआ-
स्थात् ॥ २।८

**दन्दशूककरा**

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ३८।९

**क्रोंची**

मही द्यौः पृथिवी च नऽइमं यज्ञम्मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥ ८।३२

**मृगशीर्षा**

उपयामगृहीतोसि हरिरसि हारियोजनो हरिभ्यान्त्वा ।
हर्य्योर्द्धाना स्थ सहसोमाऽइन्द्राय ॥ ८।११

**वृषानना**

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ १२।११२

**व्यात्तास्या**

कार्षिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि ।
समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥ ६।२८

**धूमनिःश्वासा**

त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् ॥ ३।६०

**व्योमैकचरणोर्ध्वदृशा**

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्मंऽइषाण सर्व्वलोकम्मंऽइषाण ॥ ३१।२२

**तापिनी**

विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि ।
वैष्णवमसि विष्णवे त्वा ॥ ५।२१

**शोषणीदृष्टी**

ब्राह्मणमद्य विदेयम्पितृमन्तम्पैतृमत्यमृषिमार्षेयँ सुधातुदक्क्षिणम् ।
अस्म्मद्राता देवत्रा गच्छत प्रदातारमाविशत ॥ ७।४६

**कोटरी**

या व्याघ्रँविषूचिकोभौ वृकञ्च रक्षति ।
श्येनम्पतत्रिणँ सिँहँ सेमम्पात्वँहसः ॥ १९।१०

**स्थूलनासिका**

एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मऽएकादश च मऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च मऽएकविँशतिश्च मऽएकविँशतिश्च मे त्रयोविँशतिश्च मे त्रयोविँशतिश्च मे पञ्चविँशतिश्च मे पञ्चविँशतिश्च मे सप्तविँशतिश्च मे सप्तविँशतिश्च मे नवविँशतिश्च मे नवविँशतिश्च मऽएकत्रिँशच्च मऽएकत्रिँशच्च मे त्रयस्त्रिँशच्च मे यज्ञेन कल्पन्ताम् ॥ १८।२४

**विद्युत्प्रभा**

ब्रह्माणि मे मतयः शँ सुतासः शुष्म्मंऽइयर्त्ति प्रभृतो मेऽअद्रिः ।
आशासते प्रतिहर्य्यन्त्युक्थेमा हरी वहतस्ता नोऽअच्छ ॥ ३३।७८

बलाकास्या

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरँवहन्ति मन्यवे ॥ १३।३५

मार्जारी

सुपर्णोसि गुरुत्मान्पृष्ठे पृथिव्याः सीद ।
भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिशऽउद्दृँह ॥ १७।७२

कटपूतना

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ १६।२

अट्टाट्टहासा

देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासन्देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ २७।३

कामाक्षी

इदँविष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाँसुरे स्वाहा ॥ ५।१५

मृगाक्षी

वृष्णऽऊर्म्मिरसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृष्णऽऊर्म्मिरसि राष्ट्रदा राष्ट्रम-
मुष्मै देहि वृषसेनोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृषसेनोसि राष्ट्रदा राष्ट्रम-
मुष्मै देहि ॥ १०।२

२मृगलोचना

भार्यै दार्वाहारम्प्रभायाऽअग्न्येधम्ब्रध्नस्य विष्टपायाभिषेक्तारँवर्षिष्ठाय नाकाय
परिवेष्टारन्देवलोकाय पेशितारम्मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो लोकेभ्यऽ
उपसेक्तारमवऽऋत्यै वधायोपमन्थितारम्मेधाय वासःपल्पूलीम्प्रकामाय रजयि-
त्रीम् ॥ ३०।१

ध्यानम्

योगेयोगे तवस्तरँवाजेवाजे हवामहे । सखायऽइन्द्रमूतये ॥ ११।१४

# क्षेत्रपालमण्डलदेवतास्थापनम्

**क्षेत्रपालः**

नमोस्त्तु सर्प्पेब्भ्यो ये के च पृथिवीमनु ।
येऽअन्तरिक्क्षे ये दिवि तेब्भ्यः सर्प्पेब्भ्यो नमः ॥ १३।६

**अजरः**

पावकया यश्चितयन्त्या कृपा क्क्षामन्त्रुरुचऽउषसो न भानुना ।
तूर्व्वन्न यामन्नेतशस्य नू रणऽआ यो घृणे न ततृषाणोऽअजरः ॥ १७।१०

**व्यापकः**

प्रथमा वाᳬ सरथिना सुवर्ण्णा देवौ पश्श्यन्तौ भुवनानि विश्श्वा ।
अपिप्प्रयञ्चोदना वाम्मिमाना होतारा ज्ज्योतिः प्प्रदिशा दिशन्ता ॥ २९।७

**इन्द्रचौरः**

इन्द्रस्य व्वज्रो मरुतामनीकम्मित्रस्य गब्भो व्वरुणस्य नाभिः ।
सेमान्नो हव्यदातिञ्जुषाणो देव रथ प्प्रति हव्या गृभाय ॥ २९।५४

**इन्द्रमूर्तिः**

एवेदिन्द्रँव्वृषणँव्वज्ज्रबाहुँव्वसिष्ठासोऽअब्भ्यर्च्चन्त्यर्क्कैः ।
स न स्तुतो व्वीरवद्धातु गोमद्यूयम्पात स्वस्तिभिः सदा नः ॥ २०।५४

**उक्षः**

उक्क्षा समुद्रोऽअरुणः सुपर्ण्णः पूर्व्वस्य योनिम्पितुराविवेश ।
मद्ध्ये दिवो निहितः पृश्निरश्म्मा व्विचक्क्रमे रजसस्प्पात्यन्तौ ॥ १७।६०

**कुष्माण्डः**

यद्देवा देवहेडनन्देवासश्चकृमा व्वयम् ।
अग्निर्म्मा तस्म्मादेनसो व्विश्श्वान्मुञ्चत्त्वᳬहसः ॥ २०।१४

**वरुणः**

इमम्मे व्वरुण श्श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ २१।१

**बटुकः**

नहि स्पश॒मवि॑दन्न॒न्यम॒स्माद्वै॑श्वान॒रात्पु॑रऽए॒तार॑म॒ग्नेः ।
एमे॑नमवृधन्न॒मृता॒ऽअम॑र्त्त्यं वैश्वान॒रं क्षैत्र॑जित्याय दे॒वाः ॥ ३३।६०

**विमुक्तः**

मु॒ञ्चन्तु॑ मा शप॒थ्या॒दथो॑ वरु॒ण्या॒दु॒त ।
अथो॑ य॒मस्य॒ पड्वी॑शात्सर्व॑स्माद्देवकिल्बि॒षात् ॥ १२।९०

**लिप्तकायः**

कु॒र्वन्ने॒वेह कर्म्मा॑णि जिजीवि॒षेच्छ॒तꣳ समाः॑ ।
ए॒वन्त्वयि॒ नान्यथे॒तो॑ऽस्ति॒ न कर्म्म॑ लिप्यते॒ नरे॑ ॥ ४०।२

**लीलाकः**

अर्म्मे॑भ्यो हस्तिप॒ञ्जवा॑याश्वप॒म्पुष्ट्यै॑ गोपा॒लं वी॒र्य्या॑याविपा॒लन्तेज॑सेऽजपा॒लमिरा॑यै
की॒नाशं॑ कीला॒लाय॑ सुराका॒रम्भ॒द्राय॑ गृह॒पꣳ श्रेय॑से वित्त॒धमाध्य॑क्ष्याया॑नुक्ष॒-
त्तार॑म् ॥ ३०।११

**एकदंष्ट्रः**

सु॒प॒र्ण्णँ व॑स्ते मृ॒गोऽअ॑स्या॒ दन्तो॒ गोभिः॒ सन्न॑द्धा पतति॒ प्रसू॑ता ।
यत्रा॒ नरः॒ सञ्च॒ वि च॒ द्रव॑न्ति॒ तत्रा॒स्मभ्य॒मिष॑वः॒ शर्म्म॑ यꣳसन् ॥ २९।४८

**ऐरावतः**

प्र॒जाप॑तये च वा॒यवे॑ च गोमृ॒गो वरु॑णायार॒ण्यो मे॒षो य॒माय॒ कृष्णो॑ मनुष्यरा॒-
जाय॑ म॒र्क्कटः॑ शार्दू॒लाय॑ रो॒हिदृ॑ष॒भाय॑ गव॒यी क्षि॑प्रश्ये॒नाय॒ वर्त्ति॑का॒ नील॑ङ्गोः
क्रि॒मिः स॑मु॒द्राय॑ शिशु॒मारो॑ हि॒मव॑ते ह॒स्ती ॥ २४।३०

**ओषधिघ्नः**

ओष॑धयः॒ सम॑वदन्त॒ सोमे॑न स॒ह राज्ञा॑ ।
यस्मै॑ कृ॒णोति॑ ब्राह्म॒णस्तꣳ रा॑जन्पारयामसि ॥ १२।९६

**बन्धनः**

त्र्य॑म्बकं यजामहे सु॒गन्धि॑म्पुष्टि॒वर्द्ध॑नम् ।
उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्म्मु॑क्षीय॒ माऽमृता॑त् ॥ ३।६०

**दिव्यक:**

देव सवितः प्प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय। दिव्यो गन्धर्वः केतपूः केतन्नः
पुनातु वाचस्पतिर्वाचन्नः स्वदतु ॥ ११।७

**कम्बल:**

सीसेन तन्त्रम्मनसा मनीषिणऽऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपँवरुणो भिषज्यन् ॥ १९।८०

**भीषण:**

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
सङ्क्रन्दनोऽनिमिषऽएकवीरः शतꣳ सेनाऽअजयत्साकमिन्द्रः ॥ ३७।३३

**गवय:**

इमꣳ साहस्रꣳ शतधारमुत्सँव्यच्यमानꣳ सरिरस्य मध्ये । घृतन्दुहानामदितिञ्ज-
नायाग्ने मा हिꣳसीः परमे व्योमन् । गवयमारण्यमनु ते दिशामि तेन चिन्वा-
नस्तन्वो निषीद । गवयन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥ १३।४९

**घण्ट:**

कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भोऽअन्तः ।
प्लाशिर्व्यक्तः शतधारऽउत्सो दुहे न कुम्भी स्वधाम्पितृभ्यः ॥ १९।८७

**व्याल:**

आक्रन्दय बलमोजो नऽआधा निष्टनिहि दुरिता बाधमानः ।
अपप्प्रोथ दुन्दुभे दुच्छुनाऽइतऽइन्द्रस्य मुष्टिरसि वीडयस्व ॥ २९।५६

**अणु:**

इन्द्रायाहि चित्रभानो सुताऽइमे त्वायवः । अण्वीभिस्तना पूतासः ॥ २०।८७

**चन्द्रवारुण:**

चन्द्रमाऽअप्स्वन्तरा सुपर्णो धावते दिवि ।
रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥ ३३।९०

**पटाटोपः**

स्वाङ्कृतोसि विश्श्वेब्भ्यऽइन्द्रियेब्भ्यो दिव्व्येब्भ्यः पार्त्थिवेब्भ्यो मनस्त्वाष्टु स्वाहा
त्वा सुभव सूर्य्याय देवेब्भ्यस्त्वा मरीचिपेब्भ्यो देवांशो यस्म्मै त्वेडे तत्सत्त्यमु-
परिप्प्रुता भङ्गेन हतोसौ फट्प्राणाय त्वा व्यानाय त्वा ॥ ७।३

**जटालः**

उग्ग्रँल्लोहितेन मित्रꣳ सौव्रत्त्येन रुद्द्रन्दौर्व्रत्त्येनेन्द्रम्प्रक्क्रीडेन मरुतो बलेन साद्ध्यान्प्र-
मुदा । भवस्य कण्ठ्यꣳ रुद्द्रस्यान्तःपार्श्व्यम्महादेवस्य यकृच्छर्वस्य वनिष्ठुः
पशुपतेः पुरीतत् ॥ ३९।९

**क्रतुः**

पवित्रेण पुनीहि मा शुक्क्रेण देव दीद्यत् । अग्ग्ने क्क्रत्त्वा क्क्रतूँ॥रनु ॥ १९।४०

**घण्टेश्वरः**

आजिग्घ्र कलशम्मह्या त्वा विशन्त्विन्दवः । पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्र-
न्धुक्क्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः ॥ ८।४२

**विटङ्कः**

वायो शुक्क्रोऽअयामि ते मद्ध्वोऽअग्ग्रन्दिविष्टिषु ।
आयाहि सोमपीतये स्प्पार्हो देव नियुत्त्वता ॥ २७।३०

**मणिमानः**

दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ।
जगती च्छन्दऽइन्द्रियमनड्वान्गौर्व्वयो दधुः ॥ २१।१८

**गणबन्धुः**

त्रीणि तऽआहुर्द्दिवि बन्धनानि त्रीण्ण्यप्प्सु त्रीण्ण्यन्तः समुद्द्रे ।
उतेव मे वरुणश्छन्त्स्यर्व्वन्यत्रा तऽआहुः परमञ्जनित्रम् ॥ २९।१५

**डामरः**

प्रतिश्श्रुत्काया ऽअर्त्तनङ्घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायाडम्ब-
राघातम्महसे वीणावादङ्क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मँवनाय वनपमन्यतो-
रण्याय दावपम् ॥ ३०।१९

**ढुण्ढिकर्णः**

शुद्धवालः सर्वशुद्धवालो मणिवालस्त ऽआश्विनाः श्येतः श्येताक्षोरुणस्ते रुद्राय
पशुपतये कर्ण्णा यामा ऽअवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥ २४।३

**स्थविरः**

बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान ऽउग्रः ।
अभिवीरो ऽअभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥ १७।३७

**दन्तुरः**

सुपर्ण्णं वस्ते मृगो ऽअस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म्म यꣳसन् ॥ २९।४८

**धनदः**

अग्ने ऽअच्छा वदेह नः प्रति नः सुमना भव ।
प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदा ऽअसि स्वाहा ॥ ९।२८

**नागकर्णः**

भद्रङ्कर्ण्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितँय्यदायुः ॥ २५।२१

**महाबलः**

बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म्म वीर्य्यम् । आत्मा क्षत्रमुरो मम ॥ २०।७

**फेत्कारः**

अपाम्फेनेन नमुचेः शिर ऽइन्द्रोदवर्त्तयः ।
विश्श्वा यदजय स्पृधः ॥ १९।७१

**चीकरः**

इदꣳ हविः प्प्रजननम्मेऽअस्तु दशवीरꣳ सर्व्वगणꣳ स्वस्त्तये ।
आत्म्मसनि प्प्रजासनि पशुसनि लोकसन्न्यभयसनि ।
अग्न्निः प्प्रजाम्बहुलाम्मे करोत्त्वन्नम्पयो रेतोऽअस्म्मासु धत्त ॥ १९।४८

**सिंहः**

या व्याग्घ्रँव्विषूचिकोभौ वृकञ्च रक्क्षति ।
श्येनम्पतत्त्रिणꣳ सिꣳहꣳ सेमम्पात्त्वꣳहसः ॥ १९।१०

**मृगः**

मृगो न भीमः कुचरो गिरिष्ठाः परावतऽआजगन्था परस्याः ।
सृकꣳ सꣳशाय पविमिन्द्र तिग्ग्मँव्वि शत्रून्ताढि वि मृधो नुदस्व ॥ १८।७१

**यक्षः**

देवहूर्य्यज्ञऽआ च वक्क्षत्सुम्न्नहूर्य्यज्ञऽआ च वक्क्षत् ।
यक्क्षदग्न्निर्द्देवो देवाँ२॥ऽआ च वक्क्षत् ॥ १७।६२

**मेघवाहनः**

जीमूतस्स्येव भवति प्प्रतीकँय्यद्वर्म्मी याति समदामुपस्त्थे ।
अनाविद्धया तन्न्वा जय त्त्वꣳ स त्त्वा वर्म्मणो महिमा पिपर्त्तु ॥ २९।३८

**तीक्ष्णोष्ठः**

तीव्व्रान्घोषान्कृण्ण्वते वृषपाणयोश्श्वा रथेभिः सह वाजयन्तः ।
अवक्क्रामन्तः प्प्रपदैरमित्त्रान्क्षिणन्ति शत्रूँ१॥रनपव्ययन्तः ॥ २९।४४

**अनलः**

वायुष्ट्वा पचतैरवत्त्वसितग्ग्रीवश्च्छागैर्न्न्यग्ग्रोधश्चमसैः शल्म्मलिर्व्वृद्ध्या ।
एष स्य राथ्थ्यो वृषा पड्भिश्चतुर्ब्भिरेदगन्ब्रह्मा कृष्ण्णश्च नोवतु नमोग्न्नये ॥ २३।१३

**शुक्लतुण्डः**

अदित्त्यास्त्त्वा पृष्ट्ठे सादयाम्म्यन्तरिक्क्षस्य धर्त्रीँव्विष्ट्टम्भनीन्दिशामाधिपत्क्कीम्भुवना-
नाम् । ऊर्म्मिर्द्द्रप्प्सोऽअपामसि व्विश्श्वकर्म्मा तऽऋषिरश्श्विनाद्ध्वर्य्यू सादयतामिह
त्त्वा ॥ १४।५

**सुधालापः**

द्यौस्ते पृथिव्यन्तरिक्षँवायुश्छिद्रम्पृणातु ते ।
सूर्य्यस्ते नक्षत्रैः सह लोकङ्कृणोतु साधुया ॥ २३।४३

**बर्बरकः**

सम्बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः ।
समिन्द्रो विश्वदेवेभिरङ्क्तान्दिव्यन्नभो गच्छतु यत्स्वाहा ॥ २।२२

**पवनः**

पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ १९।४२

**पावनः**

अभ्यर्षत सुष्टुतिङ्गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमँय्यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ १७।९८

## सर्वतोभद्रमण्डलदेवतास्थापनम्

**ब्रह्मा**

ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ १३।३

**सोमः**

वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ ३।५६

**ईशानः**

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ २५।१८

**इन्द्रः**

त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ।
ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ २०।५०

**अग्निः**

त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥ ३४।१३

**यम:**

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ३८।९

**निर्ऋति:**

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ १२।६२

**वरुण:**

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽआयुः प्रमोषीः ॥ १८।४९

**वायु:**

आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ।
वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥ २७।२८

**अष्टवसव:**

सुगा वो देवाः सदनाऽअकर्म्म यऽआजग्मेदꣳ सवनञ्जुषाणाः ।
भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि स्वाहा ॥ ८।१८

**एकादशरुद्रा:**

रुद्राः सꣳसृज्य पृथिवीम्बृहज्ज्योतिः समीधिरे ।
तेषाम्भानुरजस्रऽइच्छुक्रो देवेषु रोचते ॥ ११।५४

**द्वादशादित्या:**

यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा ॥ ८।४

**अश्विनौ**

या वाङ्कशा मधुमत्यश्विना सूनृतावती । तया यज्ञम्मिमिक्षतम् ॥ ७।११

**सपैतृकविश्वेदेवा:**

ओमासश्चर्षणीधृतो विश्वे देवासऽआगत । दाश्वाꣳसो दाशुषः सुतम् । उप-
यामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ ७।३३

**सप्तयक्षा:**

अभि त्यन्देवꣳ सवितारमोण्योः कविक्रतुमर्च्चामि सत्यसवꣳ रत्नधामभि प्प्रियम्म-
तिङ्कविम् । ऊर्द्ध्वा यस्यामतिर्भाऽअदिद्युतत्सवीमनि हिरण्ण्यपाणिरमिमीत सुक्रतुः
कृपा स्वः । प्रजाब्भ्यस्त्वा प्प्रजास्त्वानुप्प्राणन्तु प्प्रजास्त्वमनुप्प्राणिहि ॥ ४।२५

**भूतनागा:**

भूताय त्वा नारातये स्वरभिविक्ख्येषन्दृꣳहन्तान्दुर्य्याः पृथिव्यामुर्व्वन्तरिक्षमन्न्वेमि
पृथिव्यास्त्वा नाभौ सादयाम्म्यदित्त्याऽउपस्त्थेऽग्ग्ने हव्यꣳ रक्ष ॥ १।११

**गन्धर्वाप्सरस:**

ऋताषाडृतधामाग्निर्ग्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ।
स नऽइदम्ब्रह्म क्षत्रम्पातु तस्म्मै स्वाहा वाट्ताब्भ्यः स्वाहा ॥ १८।३८

**स्कन्द:**

यदक्क्रन्दः प्प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्क्षा हरिणस्य बाहूऽउपस्तुत्यम्महि जातन्तेऽअर्वन् ॥ २९।१२

**नन्दीश्वर:**

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
सङ्क्रन्दनोऽनिमिषऽएकवीरः शतꣳ सेनाऽअजयत्साकमिन्द्रः ॥ १७।३३

**शूलमहाकालौ**

काषिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि ।
समापोऽअद्भिरग्ग्मत समोषधीभिरोषधीः ॥ ६।२८

**दक्षादिसप्तका:**

अदितिर्द्यौरदितिरन्तरिक्क्षमदितिर्म्माता स पिता स पुत्रः ।
विश्वे देवाऽअदितिः पञ्च जनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ २५।२३

**दुर्गा**

अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ २०।१८

**विष्णु:**

इदं विष्णुर्विचक्क्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ॥ ५।१६

**स्वधा**

पितृभ्य॑÷ स्वधायिभ्य॑÷ स्वधा नम॑÷ पितामहेभ्य॑÷ स्वधायिभ्य॑÷ स्वधा नमः
प्रपितामहेभ्यः स्वधायिभ्य॑÷ स्वधा नम॑÷ । अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ १९।३६

**मृत्युरोगौ**

परं॑ मृत्यो॒ऽअनु॒ परे॑हि॒ पन्थां॒ यस्ते॒ऽअन्य॒ऽइत॑रो देव॒याना॑त् ।
चक्षु॑ष्मते शृण्व॒ते ते॑ ब्रवीमि॒ मा नः॑ प्र॒जाᳬ री॑रिषो॒ मोत वी॒रान् ॥ ३५।७

**गणपति:**

ग॒णानां॑ त्वा ग॒णप॑तिᳬ हवामहे प्रि॒याणां॑ त्वा प्रि॒यप॑तिᳬ हवामहे नि॒धीनां॑ त्वा नि॒धिप॑तिᳬ हवामहे वसो मम ।
आ॒हम॑जानि गर्भ॒धमा त्वम॑जासि गर्भ॒धम् ॥ २३।१९

**आप:**

शन्नो॑ दे॒वीर॒भिष्ट॑य॒ऽआपो॑ भवन्तु पी॒तये॑ । शंय्योर॒भि स्र॑वन्तु नः ॥ ३६।१२

**मरुत:**

मरु॑तो॒ यस्य॒ हि क्षये॑ पा॒था दि॒वो वि॑महसः । स सु॑गो॒पात॑मो॒ जनः॑ ॥ ८।३१

**पृथिवी**

स्यो॒ना पृ॑थिवि नो भवानृक्ष॒रा नि॒वेश॑नी । यच्छा॑ नः॒ शर्म॑ स॒प्रथाः॑ ॥ ३६।१३

**गङ्गादिनद्य:**

पञ्च॑ न॒द्यः॑ सर॑स्वती॒मपि॑ यन्ति॒ सस्रो॑तसः ।
सर॑स्वती तु प॑ञ्च॒धा सो दे॒शेऽभ॑वत्स॒रित् ॥ ३४।११

**सप्तसागरा:**

इ॒मम्मे॑ वरुण श्रुधी॒ हव॑म॒द्या च॑ मृडय । त्वाम॑व॒स्युरा च॑के ॥ २१।१

**मेरु:**

प्र प॑र्वतस्य वृष॒भस्य॑ पृ॒ष्ठान्नाव॑श्चरन्ति स्व॒सिच॑ऽइयाना॒ः । ताऽआव॑वृत्रन्नध॒रागुद॑क्ता॒ऽअहिं॒म्बुध्न्य॒मनु॒ रीय॑माणाः । विष्णो॑र्वि॒क्रम॑णमसि॒ विष्णो॑र्वि॒क्रान्त॑मसि॒ विष्णोः॑ क्रा॒न्तम॑सि ॥ १०।१९

**गदा**

ग॒णानां॑ त्वा ग॒णप॑तिᳬ हवामहे प्रि॒याणां॑ त्वा प्रि॒यप॑तिᳬ हवामहे नि॒धीनां॑ त्वा नि॒धिप॑तिᳬ हवामहे वसो मम ।
आ॒हम॑जानि गर्भ॒धमा त्वम॑जासि गर्भ॒धम् ॥ २३।१९

**त्रिशूलम्**

त्रिᳬशद्धाम॒ वि रा॑जति॒ वाक्प॑त॒ङ्गाय॑ धीयते । प्रति॒ वस्तो॒रह॒ द्युभिः॑ ॥ ३।८

**वज्रम्**

मुहाँ२॥ऽइन्द्रो वज्रहस्तः षोडशी शर्म्म यच्छतु। हन्तु पाप्मानँय्योऽस्मान्द्वेष्टि॥ २६।१०

**शक्तिः**

वसु च मे वसतिश्च मे कर्म्म च मे शक्तिश्च मेर्त्थश्च मऽएमश्च मऽइत्या च मे
गतिश्च मे यज्ञेन कल्पन्ताम् ॥ १८।१५

**दण्डः**

इडऽएह्यदितऽएहि काम्म्याऽएत । मयि वः कामधरणम्भूयात् ॥ ३।२७

**खड्गः**

खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिꣳ-
हो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषान्देवानाम्पृषतः ॥ २४।४०

**पाशः**

उदुत्तमँवरुण पाशमस्म्मदवाधमँवि मद्ध्यमꣳ श्रथाय ।
अथा वयमादित्त्य व्रते तवानागसोऽअदितये स्याम ॥ १२।१२

**अङ्कुशः**

अꣳशुश्च मे रश्मिश्च मेदाभ्यश्च मेधिपतिश्च मऽउपाꣳशुश्च मेन्तर्य्यामश्च
मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्प्रतिप्प्रस्थानश्च मे शुक्रश्च मे
मन्थी च मे यज्ञेन कल्पन्ताम् ॥ १८।१९

**गौतमः**

आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः । पितरञ्च प्प्रयन्त्स्वः ॥ ३।६

**भरद्वाजः**

अयन्दक्षिणा विश्वकर्म्मा तस्य मनो वैश्वकर्म्मणङ्ग्रीष्म्मो मानसस्त्रिष्टुब्ग्रैष्म्मी
त्रिष्टुभः स्वारꣳ स्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽऋषिः
प्प्रजापतिगृहीतया त्वया मनो गृह्णामि प्प्रजाभ्यः ॥ १३।५५

**विश्वामित्रः**

इदमुत्तरात्स्वस्तस्य श्श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप्प्शारद्यनुष्टुभऽऐडमैडान्मन्थी
मन्थिनऽएकविꣳशऽएकविꣳशाद्वैराजँविश्वामित्रऽऋषिः प्प्रजापतिगृहीतया त्वया
श्श्रोत्रङ्गृह्णामि प्प्रजाभ्यः ॥ १३।५७

**कश्यप:**

त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥ ३।६२

**जमदग्नि:**

अयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसँवर्षाश्चाक्षुष्यो जगती वार्षी जगत्या
ऽऋक्समम्‌ऋक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपञ्जमदग्निर्ऋषिः प्रजा-
पतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥ १३।५६

**वसिष्ठ:**

अयम्पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै
गायत्रङ्गायत्रादुपांशुरुपांशोस्त्रिवृत्त्रिवृतो रथन्तरँवसिष्ठऽऋषिः प्रजापति-
गृहीतया त्वया प्राणङ्गृह्णामि प्रजाभ्यः ॥ १३।५४

**अत्रि:**

अत्र पितरो मादयध्वँय्यथाभागमावृषायध्वम् ।
अमीमदन्त पितरो यथाभागमावृषायिषत ॥ २।३१

**अरुन्धती**

तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकङ्गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचने दिवः ॥ १५।५०

**इन्द्राणी**

अदित्यै रास्नासीन्द्राण्याऽउष्णीषः । पूषासि घर्माय दीष्व ॥ ३८।३

**कौमारी**

यत्र बाणाः सम्पतन्ति कुमारा विशिखाऽइव ।
तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म्म यच्छतु विश्वाहा शर्म्म यच्छतु ॥ १७।४८

**ब्राह्मी**

इन्द्रायाहि तूतुजानऽउप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ २०।८९

**वाराही**

आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः । पितरञ्च प्रयन्त्स्वः ॥ ३।६

**चामुण्डा**

अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ २३।१८

**वैष्णवी**

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ १२।११२

**माहेश्वरी**

या ते॑ रुद्र शि॒वा त॒नूरघो॒रापा॑पकाशिनी ।
तया॑ नस्त॒न्वा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि ॥ १६।२

**वैनायकी**

सम॑क्ख्ये दे॒व्या धि॒या सन्द॑क्षिणयो॒रुच॑क्क्षसा ।
मा म॒ऽआयु॒ꣳ प्प्रमो॑षी॒र्म्मोऽअ॒हन्तव॑ वी॒रँवि॑देय॒ तव॑ देवि स॒न्दृशि॑ ॥ ४।२३

## कुण्डस्थदेवानां स्थापनम्

**भूमि:**

भूर॑सि॒ भूमि॑र॒स्यदि॑तिरसि वि॒श्श्वधा॑या वि॒श्श्व॑स्य॒ भुव॑नस्य ध॒र्त्री ।
पृथि॒वीँय्य॑च्छ पृथि॒वीन्दृ॑ꣳह पृथि॒वीम्मा हि॑ꣳसीः ॥ १३।१८

**कूर्म:**

यस्य॑ कु॒र्म्मो गृ॒हे ह॒विस्तम॑ग्ने व॒र्द्धया॒ त्वम् ।
तस्मै॑ दे॒वाऽअधि॑ब्रवन्न॒यञ्च॒ ब्रह्म॑ण॒स्प्पति॑ः ॥ १७।५२

**अनन्त:**

स्यो॒ना पृ॑थिवि नो भवानृक्ष॒रा नि॒वेश॑नी । यच्छा॑ नः॒ शर्म्म॑ स॒प्प्रथा॑ः ॥ ३६।१३

**विश्वकर्मा**

वि॒श्श्वक॑र्म्मन्ह॒विषा॒ वर्द्ध॑नेन त्रा॒तार॒मिन्द्र॑मकृणोरव॒ध्यम् । तस्मै॒ विश॒ꣳ सम॑नमन्त
पू॒र्वीर॒यमु॒ग्ग्रो वि॒हव्यो॒ यथास॑त् । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा वि॒श्श्वक॑र्म्मणऽए॒ष ते॒
योनि॒रिन्द्रा॑य त्वा वि॒श्श्वक॑र्म्मणे ॥ १७।२२

**विष्णु:**

इ॒दँवि॒ष्ण्णुर्वि च॑क्क्रमे त्रे॒धा नि द॑धे प॒दम् । समू॑ढमस्य पाꣳसु॒रे स्वाहा॑ ॥ ५।१५

**ब्रह्मा**

ब्रह्म॑ जज्ज्ञा॒नम्प्र॑थ॒मम्पु॒रस्ता॒द्वि सी॑म॒तः सु॒रुचो॑ वे॒नऽआ॑वः ।
स बु॒ध्न्याऽउप॒माऽअ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विव॑ः ॥ १३।३

**रुद्र:**

नम॑स्ते रुद्र म॒न्यव॑ऽउ॒तो त॒ऽइष॑वे॒ नम॑ः । बा॒हुभ्या॑मु॒त ते॒ नम॑ः ॥ १६।१

**योनि:**

क्ष॒त्रस्य॒ योनि॑रसि क्ष॒त्रस्य॒ नाभि॑रसि ।
मा त्वा॑ हिꣳसी॒न्मा मा॑ हिꣳसीः ॥ २०।१

कण्ठः

नीलंग्ग्रीवाः शितिकण्ठा दिवर्ठ रुद्राऽउपश्रिताः ।
तेषार्ठ सहस्रयोजनेव धन्वानि तन्मसि ॥ १५।५६

नीलंग्ग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः ।
तेषार्ठ सहस्रयोजनेव धन्वानि तन्मसि ॥ १६।५७

नाभिः

नाभिर्म्मे चित्तँविज्ञानम्पायुर्म्मेपचितिर्भसत् ।
आनन्दनन्दावाण्डौ मे भगः सौभाग्ग्यम्पसः ।
जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मि विशि राजा प्प्रतिष्ठितः ॥ २०।९

वास्तोष्पतिः

**वास्तोष्पते प्रतिजानिह्यस्मान्त्स्वावेशोऽअनमीवो भवानः ।**
**षत्वेमहे प्रतितन्नो जुषस्वशन्नो भव द्विपदे शं चतुष्पदे ॥**

## अग्निस्थापनम्

अग्न्यावाहनम्

एषो ह देवः प्प्रदिशोनु सर्व्वाः पूर्व्वो ह जातः सऽउ गर्ब्भेऽअन्तः ।
सऽएव जातः स जनिष्ष्यमाणः प्प्रत्त्यङ्ङ्जनास्तिष्ठति सर्व्वतोमुखः ॥ ३२।८

भ्रामणम्

अग्ग्निन्दूतम्पुरो दधे हव्ययवाहमुपब्ब्रुवे । देवाँ२॥ऽआसादयादिह ॥ २२।१७

ध्यानम्

चत्त्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्प्त हस्त्तासोऽअस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्याँ२॥ऽआविवेश ॥ १७।९१

अग्ग्ने नय सुपथा रायेऽअस्म्मान्विश्श्वानि देव वयुनानि विद्वान् । युयोद्ध्यस्म्म-
ज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिंविधेम ॥ ५।३६

# ग्रह स्थापनम्

**सूर्यः**

आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ३३।४३

**चन्द्रमा**

इमन्देवाऽअसपत्नꣳ सुवद्ध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्ये-
न्द्रियाय । इममुमुष्य्य पुत्रममुष्ष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोस्म्माक-
म्ब्राह्मणानाꣳ राजा ॥ ९।४०

**भौमः**

अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।
अपाꣳ रेताꣳसि जिन्वति ॥ ३।१२

**बुधः**

उद्बुध्यस्वाग्ने प्प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥ १८।६१

**बृहस्पतिः**

बृहस्पते अति यदर्य्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्र-
जात तदस्म्मासु द्रविणन्धेहि चित्रम् ॥ २६।३

**शुक्रः**

अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ १९।७५

**शनैश्चरः**

शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ ३६।१२

**राहुः**

कया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ३६।४

**केतुः**

केतुङ्कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे । समुषद्भिरजायथाः ॥ २९।३७

**ईश्वरः**

त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् ॥ ३।६०

**उमा**

श्रीश्चं ते लक्ष्मीश्च पत्न्यांवहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुम्मंऽइषाण सर्वलोकम्मंऽइषाण॥ ३१।२२

**स्कन्दः**

यदक्रन्दः प्प्रथमञ्जायमानऽउद्यन्त्समुद्द्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महि जातन्तेऽअर्वन्॥ २९।१२

**विष्णुः**

विष्ण्णो रराटमसि विष्ण्णोः श्नप्प्त्रे स्त्थो विष्ण्णोः स्यूरसि विष्ण्णोर्द्ध्रुवोसि।
वैष्ण्णवमसि विष्ण्णवे त्वा॥ ५।२१

**ब्रह्मा**

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी
महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः
सभेयो युवास्य यजमानस्य वीरो जायतान्निकामेनिकामे नः पर्जन्यो वर्षतु फल-
वत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥ २२।२२

**इन्द्रः**

सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहा शूर विद्वान्। जहि शत्रूँ२ऽरप मृधो
नुदस्वाथाभयङ्कृणुहि विश्वतो नः। उपयामगृहीतोसीन्द्राय त्वा मरुत्वतऽएष ते
योनिरिन्द्राय त्वा मरुत्वते॥ ७।३७

**यमः**

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे॥ ३८।९

**कालः**

कार्षिरसि समुद्रस्य त्वा क्षित्त्याऽउन्नयामि।
समापोऽअद्भिरग्मत समोषधीभिरोषधीः॥ ६।२८

**चित्रगुप्तः**

चित्रावसो स्वस्ति ते पारमशीय॥ ३।१८

**अग्निः**

अग्निन्दूतम्पुरो दधे हव्यवाहमुपब्रुवे। देवाँ२ऽआसादयादिह॥ २२।१७

**आपः**

आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन। महे रणाय चक्षसे॥ ३६।१४

पृथिवी

स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्रथाः ॥ ३६।१३

विष्णुः

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे स्वाहा ॥ ५।१५

इन्द्रः

त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ।
ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ २०।५०

इन्द्राणी

अदित्यै रास्नासीन्द्राण्याऽउष्णीषः । पूषासि घर्म्माय दीष्व ॥ ३८।३

प्रजापतिः

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयꣳ स्याम पतयो रयीणाम् ॥ २३।६५

सर्पाः

नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।
येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ॥ १३।६

ब्रह्मा

ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ १३।३

गणपतिः

गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा
निधिपतिꣳ हवामहे वसो मम ।
आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ २३।१९

दुर्गा

अम्बेऽअम्बिकेम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ २३।१८

वायुः

वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥ २७।३२

**आकाश:**

घृतङ्घृतपावानः पिबत वसाँवसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ।
दिशः प्प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्ग्भ्यः स्वाहा ॥ ६।१९

**अश्विनौ**

या वाङ्कशा मधुमत्त्यश्विना सूनृतावती । तया यज्ञम्मिमिक्षतम् ॥ ७।११

**वास्तोष्पति:**

वास्तोष्पते प्रतिजानिह्यस्मान्त्स्वावेशोऽअनमीवो भवान: ।
यत्वेमहे प्रतितन्नो जुषस्वशन्नो भव द्विपदे शं चतुष्पदे ॥

**क्षेत्राधिपति:**

नहि स्प्पशमविदन्नन्न्यमस्म्माद्वैश्श्वानरात्त्पुरऽएतारमग्ग्नेः ।
एमेनमवृधन्नमृताऽअमर्त्त्यंवैश्श्वानरङ्क्षैत्रजित्त्याय देवाः ॥ ३३।६०

**इन्द्र:**

त्रातारमिन्द्रमवितारमिन्द्रङ् हवेहवे सुहवङ् शूरमिन्द्रम् ।
ह्वयामि शक्रम्पुरुहूतमिन्द्रंꣳ स्वस्ति नो मघवा धात्त्विन्द्रः ॥ २०।५०

**अग्नि:**

त्वन्नोऽअग्ग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्न्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्त्तव व्रते ॥ ३४।१३

**यम:**

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ३८।९

**निर्ऋति:**

असुन्न्वन्तमयजमानमिच्छ स्तेनस्येत्त्यामन्विहि तस्करस्य ।
अन्न्यमस्म्मदिच्छ सा तऽइत्त्या नमो देवि निर्ऋते तुब्भ्यमस्तु ॥ १२।६२

**वरुण:**

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा नऽआयुः प्प्रमोषीः ॥ १८।४९

**वायुः**

आ नो॑ नि॒युद्भि॑÷ श॒तिनी॑भिरध्व॒रꣳ स॑ह॒स्रिणी॑भि॒रुप॑याहि य॒ज्ञम् ।
वायो॑ऽअ॒स्मिन्त्सव॑ने मादयस्व यू॒यम्पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ २७।२८

**सोमः**

व॒यꣳ सो॑म व्र॒ते तव॒ मन॑स्त॒नूषु॒ बिभ्र॑तः । प्र॒जाव॑न्तः सचेमहि ॥ ३।५६

**ईशानः**

तमीशा॑नं॒ जग॑तस्त॒स्थुष॒स्पतिं॑ धिय॒ञ्जिन्व॒मव॑से हूमहे व॒यम् ।
पू॒षा नो॒ यथा॒ वेद॑सा॒मस॑द्वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥ २५।१८

**ब्रह्मा**

अ॒स्मे रु॒द्रा मे॒हना॒ पर्व॑तासो वृत्र॒हत्ये॒ भर॑हूतौ स॒जोषाः॑ ।
यः शꣳस॑ते स्तुव॒ते धायि॑ प॒ज्रऽइन्द्र॑ज्येष्ठाऽअ॒स्माँ२॥ऽअ॑वन्तु दे॒वाः ॥ ३३।५०

**अनन्तः**

स्यो॒ना पृ॑थिवि नो भवानृक्ष॒रा नि॒वेश॑नी । यच्छा॑ नः॒ शर्म्म॑ स॒प्रथाः॑ ॥ ३६।१३

## अग्न्युत्तारणम्

समु॒द्रस्य॑ त्वाव॒कयाग्ने॒ परि॑ व्ययामसि । पा॒व॒कोऽअ॒स्मभ्य॑ꣳ शि॒वो भ॑व ॥

हि॒मस्य॑ त्वा ज॒रायु॒णाग्ने॒ परि॑ व्ययामसि । पा॒व॒कोऽअ॒स्मभ्य॑ꣳ शि॒वो भ॑व ॥
उप॒ ज्मन्नुप॑ वेत॒सेऽव॑तर न॒दीष्वा । अग्ने॑ पि॒त्तम॒पाम॑सि॒ मण्डू॑कि॒ ताभि॒राग॑हि॒ सेमं नो॑
य॒ज्ञम्पा॑व॒कव॑र्णꣳ शि॒वङ्कृ॑धि ॥
अ॒पामि॒दन्न्यय॑नꣳ समु॒द्रस्य॑ नि॒वेश॑नम् ।
अ॒न्याँस्ते॑ऽअ॒स्मत्त॑पन्तु हे॒तय॑÷ पा॒व॒कोऽअ॒स्मभ्य॑ꣳ शि॒वो भ॑व ॥
अग्ने॑ पावक रो॒चिषा॑ म॒न्द्रया॑ देव जि॒ह्वया॑ । आ दे॒वान्व॑क्षि॒ यक्षि॑ च ॥
स नः॑÷ पावक दीदि॒वोऽग्ने॑ दे॒वाँ२॥ऽइ॒हाव॑ह । उप॑ य॒ज्ञꣳ ह॒विश्च॑ नः ॥
पा॒व॒कया॒ यश्चि॒तय॑न्त्या कृ॒पा क्षाम॑न्रुरु॒चऽउ॒षसो॒ न भा॒नुना॑ ।
तूर्व॒न्न याम॒न्नेत॑शस्य॒ नू रण॒ऽआ यो घृ॒णे न त॑तृषा॒णोऽअ॒जरः॑÷ ॥

नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ।
अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥
नृषदे वेडप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट्स्वर्विदे वेट् ॥
ये देवा देवानाँय्यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयम्पिबन्तु मधुनो घृतस्य ॥
ये देवा देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुरऽएतारोऽअस्य ।
येभ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्याऽअधि स्नुषु ॥
प्राणदाऽअपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥

१७ । (४-१५)

ग्रहध्यानम्

ग्रहाऽऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषाँविशिप्रियाणाँवोहमिषमूर्जꣳ समग्र-
भमुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ९।४

## लक्ष्मीहोमः

सदसस्पतिमद्भुतम्प्रियमिन्द्रस्य काम्यम् ।
सनिम्मेधामयासिषꣳ स्वाहा ॥
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनङ्कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदम्मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा ॥ ३२ । (१३-१६)

## नवाहुतयः

त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ २१।३

स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ।
अवयक्ष्व नो वरुण॒ रराणो वीहि मृडीकॅ सुहवो नऽएधि ॥ २१।४
अयाश्चाग्नेस्यनभि शस्तिपाश्चसत्यमित्वमयाऽअसि ।
अयानोयज्ञंवहास्ययानो धेहिभेखजॅस्वाहा ॥
येतेशतं वरुण ये सहस्रं यज्ञिया:पाशावितातामहान्त: ।
तेभिर्नोऽअद्य सवितोत विष्णुर्व्विश्वेमुञ्चन्तु मरुत: स्वर्क्का: स्वहा ॥
उदुत्तमँवरुण पाशमुस्म्मदवाधमँवि मद्ध्यमछं श्रथाय ।
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥ १२।१२

## दिक्पालबलिदानम्

प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा
प्प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्द्ध्वायै
दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ २२।२४

हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्प्रोथते स्वाहा
प्प्रप्प्रोथाय स्वाहा गन्धाय स्वाहा घ्घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा
सन्दिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा
जाग्ग्रते स्वाहा कूजते स्वाहा प्प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय
स्वाहा सॅहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्प्रायणाय स्वाहा ॥ २२।७

## पूर्णाहुति:

समुद्राद्रूर्म्मिर्म्मधुमाँ॥ऽउदारदुपाछंशुना सममृतत्त्वमानट् ।
घृतस्य नाम गुह्यँय्यदस्ति जिह्वा देवानाममृतस्य नाभि÷ ॥
वयन्नाम प्प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभि: ।
उप ब्रह्मा शृणवच्छस्यमानञ्चतु÷श्शृङ्गोवमीद्गौरऽएतत् ॥
चत्त्वारि श्शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्प्त हस्तासोऽअस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ॥ऽआविवेश ॥
त्रिधा हितम्पणिभिर्ग्गुह्यमानङ्गवि देवासो घृतमन्न्वविन्दन् ।
इन्द्रऽएकॅ सूर्य्यऽएकञ्जजान वेनादेकछं स्वधया निष्टतक्षु: ॥

एताऽअर्षन्ति हृद्यात्समुद्राच्छतव्व्रजा रिपुणा नावचक्षे ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ययो वेतसो मद्ध्यऽआसाम् ॥
सम्यक्स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
एतेऽअर्षन्त्यूर्म्मयो घृतस्य मृगाऽइव क्षिपणोरीषमाणाः ॥
सिन्धोरिव प्राद्ध्वने शूघनासो वातप्प्रमियः पतयन्ति यह्वाः ।
घृतस्य धाराऽअरुषो न वाजी काष्ठा भिन्दन्नूर्म्मिभिः पिन्वमानः ॥
अभिप्प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासोऽअग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्य्यति जातवेदाः ॥
कन्याऽइव वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽअभि तत्पवन्ते ॥
अब्भ्यर्षत सुष्टुतिङ्गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमँय्यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥
धामन्ते विश्वम्भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तन्तऽऊर्म्मिम् ॥ १७। (८९-९९)

पुनस्त्वादित्या रुद्रा वसवः समिन्धताम्पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वन्तन्वँव्वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ १२।४४

सप्त तेऽअग्ने समिधः सप्त जिह्वाः सप्तऽऋषयः सप्त धाम प्प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥ १७।७९

मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या वैश्वानरमृतऽआ जातमग्निम् ।
कविꣳ सम्म्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः ॥ ३३।८

पूर्ण्णा दर्वि परापत सुपूर्ण्णा पुनरापत । वस्नेव विक्क्रीणावहाऽइषमूर्जꣳ शतक्रतो ॥ ३।४९

अथ प्रातर्हुते वाऽहुते वा । यतरथा कामयेत सोऽस्याऽअनिरशितायै कुम्भ्यै दर्व्योपहन्ति 'पूर्ण्णा दर्वि परापत सुपूर्ण्णा पुनरापत । वस्नेव विक्रीणावहा ऽइषमूर्जꣳ शतक्रतो ॥

# वसोर्धारा

सप्त तेऽअग्ने समिधः सप्त जिह्वाः सप्तऽऋषयः सप्त धाम प्प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥

शुक्रज्योतिश्च चित्रज्योतिश्च सत्त्यज्योतिश्च ज्योतिष्म्माँश्च ।
शुक्रश्चऽऋतपाश्चात्त्यꣳहाः ॥
ईदृङ्चान्यादृङ् सदृङ्च प्प्रतिसदृङ् । मितश्च सम्मितश्च सभराः ॥
ऋतश्च सत्त्यश्च ध्रुवश्च धरुणश्च । धर्त्ता च विधर्त्ता च विधारयः ॥
ऋतजिच्च सत्त्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरेऽअमित्रश्च गणः ॥
ईदृक्षासऽएतादृक्षासऽऊ षु णः सदृक्षासः प्प्रतिसदृक्षासऽएतन ।
मितासश्च सम्मितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअस्मिन् ॥
स्वतवाँश्च प्प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ॥
इन्द्रन्दैवीर्विशो मरुतोनुवर्त्मानोभवन्यथेन्द्रन्दैवीर्विशो मरुतोनुवर्त्मानोभवन् ।
एवमिमँय्यजमानन्दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥
इमꣳ स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिरस्य मद्ध्ये ।
उत्सञ्जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्व ॥
घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्म्वस्य धाम ।
अनुष्ष्वधमावह मादयस्व स्वाहाकृतँवृषभ वक्षि हव्यम् ॥ १७ । (७९-८८)

वसोः पवित्रमसि शतधारँवसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्प्वा कामधुक्षः ॥ १।३

यत्कर्म्मणात्यरीरिचम् । यद्वा न्न्यूनमिहाकरम् ॥ अग्निष्टत्स्वि-
ष्टकृद्विद्वान्त्स्विष्टꣳ सुहुतङ्करोतु स्वाहा ॥

देवता विसर्जनम्

उत्तिष्ठ ब्रह्मणस्प्पते देवयन्तस्त्वेमहे ।
उपप्प्रयन्तु मरुतः सुदानवऽइन्द्र प्प्राशूर्भवा सचा ॥ ३४।५६

अग्नि विसर्जनम्

यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वाँय्योनिङ्गच्छ स्वाहा ।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥ ८।२२